आर.एन.आई. सं.58951/94
ISSN 0975 - 0061

# आरण्यकम्

अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका
(Bi-annual Refereed Sanskrit Research Journal)

विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्नसूच्याम् ( Carelist ) अन्तर्भुक्ता

संस्कृतप्रसारपरिषद्
आरा (विहारः)

एकत्रिंशं वर्षम्-प्रथमोऽङ्कः
मार्च 2023

# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकी शोधपत्रिका संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्क-मपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि।
4. आजीवनं ग्राहकताशुल्कं द्विसहस्रं (2000) रूप्यकाणि।
5. शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 8102327064
   Email-**nilmanipathak19@gmail.com**

   **(ii) बैंक ड्राफ्ट 'संस्कृतप्रसारपरिषद्'** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रेषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
6. आरण्यकस्य बेबसाईट-**www.aranyakam.in**
7. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
8. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
9. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशः ई-मेल संकेतः, दूरभाषसंख्या च उल्लिखिताः स्युः।
10. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
11. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
12. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
13. 'आरण्यक'सम्बद्धा सर्वविधा जिज्ञासा
    **प्रो. गोपबन्धु मिश्रः, संस्कृतविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी (उ.प्र.)-221005 इति सङ्केतेन** (चल.) 9450870788 विधेया।
    Email-**gopabandhuh@gmail.com**
14. शोधलेखसम्प्रेषणं तत्सम्बद्धपत्रव्यवहारश्च
    Email-**aranyakam94@gmail.com** इति सङ्केतेन विधातव्यः।

# आरण्यकम्

**संस्कृतप्रसारपरिषदः अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका**

**विश्वविद्यालयानुदानायोगस्य( UGC )यत्नसूच्याम्( Carelist )अन्तर्भुक्ता**

**वर्षाङ्कौ - एकत्रिंशं वर्षम् - प्रथमोऽङ्कः**

**चैत्रः, वि.सं.२०८०**

**मार्च २०२३**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - 50 रूप्यकाणि* *वार्षिकं शुल्कं 100 रूप्यकाणि*
*संयुक्ताङ्कः - 100 रूप्यकाणि*

**'आरण्यकम्' इदं केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली इत्यनेन प्रदत्तेन आर्थिकानुदानेन प्रकाश्यते।**

❁

**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. राय अश्विनी कुमारः, बोधगया

❁

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❁

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
संस्कृतविभागः
काशीहिन्दूविश्वविद्यालयः, वाराणसी
पूर्वकुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)
gopabandhuh@gmail.com

❁

सह-सम्पादकौ
**डॉ. सञ्जय कुमार चौबे**
sanjaychaubey.lbs@gmail.com
**डॉ. सुनीलकुमार प्रधानः**
sunilkumarp435@gmail.com

❁

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्, महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

❁

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

शैशवे गणितशिक्षणस्य प्रारम्भकाले भागनियमावबोधनप्रसङ्गे उदाहरणानि भवन्ति स्म। तद्यथा– 21 ÷ 5 = 4, शेषः 1। अत्र चतस्रः संख्याः सन्ति, तासां नामानीत्थं कथ्यन्ते स्म – 21 नाम 'भाज्यम्', 5 नाम 'भाजकम्', 4 नाम 'भागफलम्', 1 नाम 'भागशेषः'। लौकिकेनोदाहरणेन एतस्य पोषणं यथा– यदि 21 आम्रफलानि सन्ति, तानि पञ्चसु बालकेषु विभाज्य वितीर्येरन् तर्हि प्रतिबालकं 4 आम्रफलानि प्राप्स्यन्ते, किं च 1 आम्रं तत्र भागक्रियातः शेषः भविष्यतीति।

गणितगतस्य भागस्य एषा रीतिः। एतादृशसन्दर्भे प्रसिद्धा एका कथा श्रूयते– काभ्यांचित् मार्जाराभ्यामेकदा एक एव अपूपः प्राप्तः। तस्य विभाजनपूर्वकं सेवन-विषये उभयोर्मध्ये विवादो जातः, कथं तस्य समानरूपेण विभजनं भवेदिति शङ्काकारणात्। तदा चतुरः कश्चित् वानरः आगतः। अपूपस्य द्विधा विभजनं विधाय तुलायां तेन स्थापितम्। उभयोः समानगुरुता तु नैव भवति। एकस्मिन् पार्श्वे गुरुतरः भागः भवति। तदा सः तस्य भागस्यांशविशेषं विभज्य स्वयं भुङ्क्ते। पुनः तत् तुलायाम् आदधाति। इदानीम् अपरो भागः गुरुतां गतः। तस्य भागविशेषं छित्त्वा सः खादति। एवं क्रमेण अन्ततः पूर्णः अपूपः तेनैव वानरेण भक्षितः, द्वयोरपि मार्जारयोः पश्यतोरेव। तौ अकृतापूपभक्षणौ निराशावेव स्थितौ।

एवमेवास्ति भागनियमः समाजे व्यावहारिकजीवने वा। पञ्चसु महाभूतेषु तत्तत्प्रसङ्गेषु भागमाश्रित्य महान्तो विवादाः प्रवर्तमाना भवन्तीति वयं पश्यामः। विशिष्टतया जलधारा-जलाश्रयादिभागविषये राष्ट्रयोर्मध्ये प्रान्तयोर्मध्ये अथवा प्रतिवेशिनोर्मध्ये विवादाः प्रायशः श्रूयन्ते एव। किं च सर्वेषु महाभूतेषु, अधिकस्थूलतया भूमिविषये, भागमादाय सर्वत्र विवादाः एव भवन्ति।

देशयोर्मध्ये भूमिविभागमादाय कलहो भयङ्करो भवति। तथैव प्रान्तयोः, जनपदयोः, ग्रामयोः मध्ये किं च गृहस्य अन्तः सहोदरयोः भ्रात्रोः मध्ये एष भागाश्रितो विवादः कियान् भयङ्करो भवति तद् अस्माभिः गोचरीक्रियते एव। तत्र च मार्जारयोः एतादृशविभागप्रसङ्गे कस्यचित् चतुरस्य धूर्तस्य वानरस्य इव इतरस्य स्वार्थिनः दुष्टस्य वा अनुप्रवेशः प्रायशः तादृशं विवादमधिकं विवर्धयति, किं च उभयोः पक्षयोः लाभांशं स्वीकृत्य स्वस्य स्वार्थोदरपूर्तिं साधयतीति निश्चप्रचमेव।

एतत्सर्वं विभाजनबुद्धिजं दृश्यं यद्यपि परिहारयोग्यं भवति, तथापि बहुशः

अनिवार्यमिव प्रवर्तते। अर्थात् यत् किमपि अविभक्तम् अस्ति, तत्र विभाजनबुद्धिः यदा कस्यचित् चित्ते उत्पद्यते तदा सः तद्विषये भाजकरूपेण आविर्भवति। ततः प्रारभते विभागप्रक्रिया। अर्थात् यावत्कालं भाजकः नास्ति, तावत्कालं किमपि वस्तु भाज्यत्वं नैव प्राप्नोति, भाज्यत्वस्य भाजकसापेक्षत्वात्। किञ्च सर्वदा तद् वस्तु पूर्णतया भाज्यमेव भवितुम् अर्हति इत्यपि नास्ति। यथा अत्रादौ एव दर्शितम् – 21 संख्यायाः 5 संख्यारूपेण भाजकेन भागकरणात् भागफलं तु एकमागतं किन्तु भागशेषोऽपि स्थितः,तर्हि तादृशः भागशेषः कुत्र वा गच्छेत्? यतो हि परमेश्वरस्य सृष्टौ किमपि वस्तु भौतिकेन भाजकविशेषेण पूर्णतया विभक्तं भवितुं शक्नुयादिति निश्चयः एव नास्ति। अतः मानवः विभागप्रसङ्गं परिहृत्य संयोगप्रसङ्गस्य विषये सुतरां प्रवृत्तः स्यात्, संसारकर्तुः नियमेन सर्वेषामपि सहकारतया सहावस्थानभावनया एव स्थातव्यमिति आशयस्य नानाविधैः उपायैः उदाहरणैश्च सुस्पष्टत्वात्।

किन्तु एतस्मिन् भाज्य-भाजक-भागफल-भागशेषविवेचनप्रसङ्गे अस्मासु एकम् अविभाज्यं धनं विद्यत इति परमं प्रमोदस्थानमिदम्। तदस्ति विद्याधनम्। **'न चौरहार्यं न च भ्रातृभाज्यम्'** इति भर्तृहरेः वचनात् इतरभौतिकधनं तु सहोदरैः भ्रातृभिः भाज्यं भवितुमर्हति, किन्तु विद्यारूपं ज्ञानरूपं च यद् धनं तत् केनापि कुत्रापि भाज्यं नास्ति। किं च –

**अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।**
**व्ययतो वृद्धिमाप्नोति क्षयमाप्नोति सञ्चयात्॥**

इत्युक्त्या विद्याधनस्य अपूर्वत्वम् उररीकृतमस्ति। सा च विद्या आगम-स्वाध्याय-प्रवचन-व्यवहारेति चतुर्भिः कालैः उपयुक्ता भवतीति महर्षिः पतञ्जलिर्महाभाष्ये ब्रवीति। निष्कर्षतः, भाग-भोगयोः ताभ्यां सन्नद्धानां भाज्य-भाजकादीनां बहुलतया प्रयोगभूमावस्मिन् संसारेऽपि भाग-भोगबुद्धिं परित्यज्य दानमुखेन समृद्धिं साधयद्भिः सर्वैः विद्याधनम् आगम-स्वाध्यायाभ्यां सुतरामर्जनीयम्। विकाररहितस्य भाज्यताविरहितस्य विद्याधनस्यास्य साहचर्येण भाज्यता-भोग्यतादिविकारयुक्ते भौतिकधने सत्यपि तस्य वैमनस्यव्यर्थविवादादिः दुष्प्रभावः न्यूनतां गन्तुमर्हत्येव। अत उभयोः धनयोः विद्याधनस्य श्रेयस्त्वात् तस्योपासनाया आद्यता अस्मासु सर्वेषु अवश्यं भवेत्।

अस्याः धनाख्याया विद्याया उपासनायाम् इतरोपासनाविधाविव तदाश्रयशुद्धिरपेक्षिता भवत्येव। सर्वतोभावेन आश्रयशुद्धिविषये मौलिकीं काञ्चित् चर्चां कुर्वता श्रीमता स्वामिप्रत्यगानन्दसरस्वतीवर्येण स्वस्य प्रसिद्ध 'जपसूत्रम्' इत्याख्ये पुस्तके शुद्धेः पञ्चविधत्वं विमृष्टम्– (1) आहारशुद्धिः, (2) आचारशुद्धिः, (3) विचारशुद्धिः, (4) प्रचारशुद्धिः,

(5) सञ्चारशुद्धिश्चेति। एतासु शुद्धिषु 'प्रचारशुद्धिः' साधनक्रियायाः शुद्धिं विशिष्टतया परिरक्षति। आहाराचारविचारशुद्धिभिः सङ्गदोषः विजेतुं शक्यः, तथा च सञ्चारशुद्ध्या कश्चित् युञ्जानः युक्तश्च भवितुमर्हति।

**आचारसञ्चारविचारशुद्धि-**
**माहारपूर्व्वामपि सन्दधीत।**
**युञ्जीत ताभिर्जितसङ्गदोषः**
**प्रचारशुद्धिं क्रतुसिद्धिगोप्त्रीम्॥** (जपसूत्रम्, उपोद्घातः ७)

तत्र आचार्येणोक्तं यद् आहारशुद्धिः अन्नमयं कोषं पुनाति, आचारशुद्धिः प्राणमयं कोषम्, विचारशुद्धिः मनोमयकोषम्, प्रचारशुद्धिः विज्ञानमयं कोषं तथा च सञ्चारशुद्धिः आनन्दमयं कोषं पुनाति। एतया रीत्या एतत् शुद्धिपञ्चकं क्रमशः कोषपञ्चकस्य शोधनस्य कृते निश्चितः प्रकृष्टश्चोपाय इति विज्ञातव्यमिति।

**पुनाति ह्यन्नमाहारोऽसूनाचारस्ततः क्रमात्।**
**अञ्जसौपयिकाश्चान्ये पुनन्ति कोषपञ्चकम्॥** (जपसूत्रम्, उपोद्घातः ८)

अन्नमयादिकोषपञ्चकस्य दोषः मलं वा त्रिधा विभज्यते स्वामिपादेन– (1) अणुः, (2) तनुः, (3) पृथुः। तेषु मलानां या सूक्ष्मतमा अथवा कारणरूपा अवस्था सा 'अणुः', किं च तन्मलम् 'आणवम्' अस्ति। सूक्ष्ममलं 'तनु'पदवाच्यम्, अतः तन्मलं 'मानसम्', किं च स्थूलं व्यक्तं वा मलं 'पृथु' पदवाच्यम्, तच्चास्ति 'पार्थिवम्'। शैवागमे प्रोक्तम् आणवादि मलत्रयमपि एतस्मिन् प्रसङ्गे विमर्शनीयमस्ति। एतन्मलं पुनः अधिकरणानुसारं (अर्थात् कुत्र तदस्ति इति विचारेण) कथयितुं शक्यते यत् तद् अन्नादिरूपेण पञ्चविधमस्ति, अर्थात् अन्नगतं मलम्, प्राणगतं मलम् इत्यादि। एवमेव तन्मलं त्रिविधं भवतु अथवा पञ्चविधम्, प्रणवस्य (अथवा ईश्वरवाचकस्य कस्यचित्) जपम् आश्रित्य प्रवर्त्तमाना आहारादिविशिष्टा उपर्युक्ता शुद्धिः तन्मलम् अपाकरोति।

**अणुतनुपृथुभेदैर्गृह्यते कोषदोष-**
**स्त्वधिकरणनिधानात् पार्थिवादित्वमेति।**
**त्रितयमपि मलानां पाञ्चमल्यं पुनर्वा**
**प्रणवपुटितशुद्धिस्तानपास्तान् करोति॥** (जपसूत्रम्, उपोद्घातः ९)

अत्रास्य विवेचनस्यायमाशयो यत् यत्र कश्चित् कोषः, तत्र कश्चिद् दोषोऽपि सम्भाव्यते, भवतु नाम स दोषः अणुः तनुः अथवा पृथुः, किं चास्तु नाम स कोषः अन्नमयः

मनोमयः उत आनन्दमयः। तत्र च जगति सर्वविधा उपासनाप्रक्रिया एतत्पञ्चकोषधारिणा मानवेनैव साध्या भवन्ति। अतः विद्याधनोपासनाऽपि पञ्चकोषिणा मानवेनैव सम्पादनीया, नान्येन। समुपास्यमानप्रक्रियावसरे मनुष्यस्य कृते तत्तत्कोषाणाम् अधिकरणान्याश्रित्य तादृशाः दोषाः सुतरां सम्भाव्याः सन्त्येव। तेषामपाकरणाय आहारशुद्ध्यादयः पञ्च शुद्धयः एव समर्था इति बोद्धव्यम्। अर्थात् स्वामिपादस्य '**प्रणवपुटितशुद्धिस्तान-पास्तान् करोति**' इति (उपोद्घातः ९) वचनं न केवलम् आध्यात्मिकप्रसङ्गेषु प्रणवादिजपपुटितायाः शुद्धिप्रक्रियायाः औचित्यं दर्शयति, अपि तु विद्योपासनाप्रसङ्गेऽपि तासां शुद्धीनाम् आवश्यकतां सूचयत्येव। तद्यथा– हितं मितम् ऋतं चाहारं स्वीकृत्य अन्नमयकोषे सम्भावनीयदोषापसारणं करणीयं येन विद्योपासना अग्रे सम्यक् प्रवर्त्तेत। तद्वद् उत्तमविचारा आह्रियन्ते चेत् प्राणमयकोषगताः दोषाः अपसृताः भवेयुः। उत्तमैः विचारैः सदसद्विवेकबुद्धेः सुतरां विकासः सम्भाव्यः भवति। तेन विद्योपासनायां सम्भाव्यमानाः मनोमयकोषगताः दोषाः अपसर्तुं क्षमाः भवन्ति। तथैव उत्तमप्रचारेण विज्ञानमयकोषान्तर्गताः दोषाः अपसार्येरन्, किं च सञ्चारशुद्ध्या आनन्दमयकोषान्तर्गताः सम्भाव्याः दोषाः अपसर्तुं क्षमाः भविष्यन्ति। अतः यथा अधिकरणतया सर्वेऽपि अन्नमयादिकोषाः परिगण्यन्ते, तथैव उपासनावसरे तत्र तत्र विकाराः दोषाः वा तदवस्थत्वेन आकारं लब्धुमर्हन्ति। तेषामपसारणम् एताभिः आहारादिशुद्धिभिः सुतरां सम्पादनीयाः इति स्वामिप्रत्यगानन्दसरस्वतीवर्यस्य या जपसूत्रगता दृष्टिः साऽत्रापि अत्यन्तं प्रासङ्गिकत्वेनास्माभिः ऊहितुं योग्या।

आरण्यकस्य एतत् कलेवरं पूर्वापेक्षया आकर्षकतरं भवेदिति कश्चिद् यत्नो विहितोऽस्मिन्नङ्के। एतदन्तः विद्यमानानां शोधलेखानां विषये तु अध्येतारो विद्वांस एव प्रमाणम्।

सम्पादकः

गोपबन्धु मिश्र

आरण्यकम्

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | **व्याकरणाश्रितशास्त्रकाव्यपरम्परायां रावणार्जुनीयमहाकाव्यस्य रचनारीतिविचारः** | अरिजित् गुप्तः<br>सहायकाचार्यः, संस्कृतविभागः<br>द्विजेन्द्रलालमहाविद्यालय, कृष्णनगरम्,<br>नदीया, पश्चिमबङ्गः | 1-8 |
| 2. | **'कर्मधारय'संज्ञासूत्रसमीक्षणम्** | डॉ. मलयपोडे<br>सहायकाध्यापकः, संस्कृतविभागः<br>राणीबाँधसर्वकारीयमहाविद्यालयः<br>बाँकुडा, पश्चिमबङ्गः | 9-17 |
| 3. | **किञ्चिद् रामायणीयम्** | सुन्दरकाण्डम् | 18 |
| 4. | **तत्त्वचिन्तामणौ हेत्वाभासनिरूपणे सङ्गतिप्रदर्शनम्** | डॉ. अञ्जनदासः<br>सहायकाचार्यः, संस्कृतविभागः<br>रामकृष्णमिशन् विद्यामन्दिरस्य पश्चिम-<br>बङ्गप्रदेशस्य | 19-23 |
| 5. | **किञ्चिद् रामायणीयम्** | सुन्दरकाण्डम् | 24 |
| 6. | **अनन्यो वितण्डाग्रन्थः तत्त्वो-पप्लवसिंहः** | डॉ. पूनम शर्मा<br>सहायकाचार्या, दर्शनविभागः<br>आर.एन. कॉलेज, हाजीपुर<br>बिहार | 25-31 |
| 7. | **किञ्चिद् रामायणीयम्** | सुन्दरकाण्डम् | 32 |
| 8. | **जलसम्बद्धा वैदिक्यो देवताः** | डॉ. रणजीत कुमारः<br>सहायकाचार्यः,<br>संस्कृत पालि एवं प्राकृत विभाग<br>हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः<br>धर्मशाला, हिमाचलप्रदेशः | 33-40 |

| विषयः | लेखकः | पृष्ठम् |
| --- | --- | --- |
| 9. प्रभुपादश्रीलजीवगोस्वामिनो दार्शनिकचिन्तनस्य एकः संक्षिप्तः परिचयः | डॉ. अमल कुमार करः<br>आसोसिएट् प्रोफेसर,<br>अलीपुरदूरा महिला महाविद्यालयः,<br>पश्चिमबङ्गः - 736121 | 41-48 |
| 10. महाभाष्यप्रदीपप्रकाशदिशा 'अथ शब्दानुशासनमि'ति ग्रन्थविमर्शः | राजकुमार मण्डलः<br>शोधच्छात्रः<br>रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोध संस्थानम्, वेलुडमठ, हावड़ा,<br>पश्चिमबङ्गः - 711226 | 49-59 |
| 11. किञ्चिद् रामायणीयम् | सुन्दरकाण्डम् | 60 |
| 12. ईश्वरास्तित्वसाधककार्यत्वहेतु-घटितानुमानविमर्शः | आलोकसेनः<br>विद्यावारिधिच्छात्रः, संस्कृतदर्शनविभागः<br>रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोध संस्थानम्, वेलुडमठ, हावड़ा,<br>पश्चिमबङ्ग - 711226 | 61-70 |
| 13. शिवसूत्रदृष्ट्या काश्मीरशैवदर्शने आत्मनः स्वरूपसमीक्षणम् | डॉ. पार्थसारथि शीलः<br>सहायकाध्यापकः, संस्कृतविभागः<br>त्रिपुरा केन्द्रीय विश्वविद्यालयः<br>अगरतला (त्रिपुरा) | 71-76 |


***

# व्याकरणाश्रितशास्त्रकाव्यपरम्परायां रावणर्जुनीयमहाकाव्यस्य रचनारीतिविचारः

**अरिजित् गुप्तः**

छन्दोऽलङ्कारव्याकरणादिशास्त्राणां साहित्यसुषमाभिः व्याख्यानायैव शास्त्रकाव्यस्य संरचनं जातम्। शास्त्रकाव्यपरम्परायां सर्वप्राथम्येन रावणवधाख्यं महाकाव्यमरचयत् वैयाकरणः कविः भट्टिः। भट्टिकाव्यस्य रचनारीतिमनुसृत्य परवर्तिनि काले यानि शास्त्रकाव्यानि साहित्यरूपतां प्रापुः, तेषु भट्टभीमविरचितं रावणार्जुनीयमहाकाव्यं विशेषस्थानभाग्भवति। माहिष्मतीमहीपतिना कार्तवीर्यार्जुनेन सह लङ्काधिपतेः रावणस्य सङ्गरवर्णनव्याजेन वैदिकसूत्राणि विहाय पाणिनेः अष्टाध्याय्याः निखिलानां सूत्राणाम् अष्टाध्यायीक्रमेणैव प्रयोगाः दर्शिताः अस्मिन् रावणार्जुनीये। सामूहिकतया, सप्तविंशतिसर्गात्मकेऽस्मिन् महाकाव्ये राज्ञोऽर्जुनस्य चरित्रवर्णनं तथा च रावणेन सह तस्य युद्धवर्णनमन्तिमे च रावणपराजयः अर्जुनविजयश्च काव्यव्याकरणयोः सन्मेलनसौन्दर्येण निबध्यते रूपम्। अर्जुनरावणीयकारः प्रायेण अष्टाध्याय्याः प्रत्येकपादस्य कृते एकैकं सर्गं निर्ममे। संज्ञापरिभाषाबाहुल्यात् प्रथमाध्यायस्य प्रथमं पादं परित्यज्य द्वितीयपादात् गाङ्कुटादिभ्योऽञ्णिन्ङित् (1.2.1) इति सूत्रमाश्रित्य काव्यारम्भस्तेन अकारि। प्रत्येकसर्गस्य नामकरणविषये प्रत्येकपादस्य प्रथमसूत्रं व्यवहृतं तेन। यथा गाङ्कुटादिपादे प्रथमस्सर्गः, भुवादिपादे (भूवादयो धातवः (1.3.1) इति सूत्रमाश्रित्य) द्वितीयस्सर्गः, आकडारादिपादे (आकडारादेका संज्ञा (1.4.1) इति सूत्रमाश्रित्य) तृतीयस्सर्गः इत्यादयः।

अष्टाध्याय्याः अध्यायेषु यादृशानि सूत्राणि क्रमतः वर्तन्ते, तानि अवलम्ब्य महाकाव्यस्य श्लोकाः रचिताः। सूत्राणां प्रकृतिः श्लोकस्य प्रकृतिजनयित्री। यथा तद्धितप्रत्ययानाम् उदाहरणावसरे रावणस्य उग्रस्वभाववर्णनम्, कारकसूत्राणामुदाहरणैः नृपतेः सैन्यमृगयायात्रावर्णनम्, समाससूत्राणाम् उदाहरणैः प्रकृतिवर्णनम्, कृत्प्रत्ययानां प्रयोगैः राक्षसानाम् उपद्रवकारित्वम्, रावणकृतं शिवस्तवनम्, नामधातुप्रयोगैः माहिष्मत्याः वर्णनम्, अलुक्समासोदाहरणैः रावणार्जुनयोः तुमुलसमरवर्णनम् इत्यादिविषयाः सूत्राणां क्रमं प्रकृतिं चाश्रित्य क्रियते रूपम्।

अत्रेदं विचार्यं यदधिसर्गक्रमं सङ्गरनायकप्रकृत्यादिवर्णने कवेः मौलिककवित्वम् अष्टाध्याय्याः क्रममनुसरत् प्राप्तहानि उत मुक्तप्रभावमिति वा। अर्थात् निर्दिष्टे सर्गे तत्र तत्रैव तत्तद्वर्णनं सूत्रक्रममनुसर्तुं रचितमुत घटनाया धारावाहिकप्रयोजनादित्यपि चिन्त्यम्। एतत् प्रस्तूयमानं शोधपत्रं यत् शास्त्रकाव्यपरम्परायां रावणार्जुनीयस्य अमुष्याः विशिष्टायाः शैल्याः नवीनसौन्दर्येण कथंकारं सुचारुतया संवर्ध्यते, तदेवात्र विचरितुमुद्दिष्टमस्ति।

**कृत्प्रत्ययप्रयोगाः**

अष्टाध्याय्याः प्रत्ययपादोत्तरार्धे नवमस्सर्गः रचितः। अत्र कृदतिङ् (3.1.96) इति कृदधिकारादारभ्य आद्वादशसर्गं कृत्प्रत्ययस्य विविधाः प्रयोगा उपलभ्यन्ते। अत्र नवमे सर्गे दशाननस्य सचिवस्य शुकस्य कथने विन्ध्याद्रिवर्णनं, रावणस्तुतिः, स्नान-कर्मणे नर्मदागतस्य दशग्रीवस्य प्रशंसनम्, रावणसैन्यस्य नदीस्नानेच्छा, स्नानरतस्य रावणस्य अनुचराणां ध्वंसक्रियाकारित्वमित्यादिविषया वर्ण्यन्ते, यत्र रावणस्तुतौ कृत्यप्रत्ययस्य प्रयोगो लभ्यते। एकस्मिन् श्लोके बहूनां कृत्प्रत्ययानाम् उदाहरणमपि सर्गेऽस्मिन् दृश्यते। काव्यशोभा शास्त्रचमत्कारेण भूयश्चकास्तितमाम् –

**तं कारकं शात्रवपक्षभीतेर्भेत्तारमद्रीन्द्रशिलातटानाम्।**
**आनन्दनं भृङ्गगणस्य दानै रक्षांस्यबध्नंस्तरुषु द्विपौघम्॥**[1]

कर्मण्यणपादपूर्वार्धे दशमसर्गे नर्मदापुलिने रावणेन पुष्पोपहितस्य शिवलिङ्गस्यार्चनं चर्चितम्। शिवस्तुतिप्रसङ्गः दशमसर्गे कियद्विस्तृतः लक्ष्यते, सूत्रक्रममनुसृत्यैवात्र खच्-प्रत्ययेन साकं अण्-खिष्णुच्-खुकञ् इत्यादयोऽपि प्रत्यया महादेवस्तवे प्रयुज्यन्ते –

**सर्वङ्कषा ते तनुरीश वायुरभ्रङ्कषश्चास्ततमाः पतङ्गः।**
**कुलङ्कषं वारि च वारिधीनां विश्वम्भरात्मा सखवह्निचन्द्रः॥**[2]

अत्र **''आढ्यम्भविष्णुः'', ''नग्नम्भविष्णुः'', ''सुभगम्भावुकताम्'', ''आढ्यम्भावुकताम्''** इति पदचतुष्टयं वैयाकरणकवेः काव्यमहिमानमुद्भावयति। पुनः जलसङ्क्षोभेण प्रपीडितानां मत्स्यानां वर्णने ''भञ्ज-भास-भिदो घुरच्'' (3.2.161) इत्यनेन घुरच्प्रत्ययेन ''मेदुराः'', ''विदि-भिदि-च्छिदेः कुरच्'' (3.2.162) इत्यनेन कुरच्प्रत्ययेन ''छिदुराः'' ''इण्-नश्-जि-सर्तिभ्यः क्वरप्'' (3.2.163) इत्यनेन क्वरप्प्रत्ययेन ''जित्वरा'' ''नश्वराः'' इति पदानि रमणीयतया उपस्थाप्यन्ते –

**जित्वरा मेदुरा मीनाश्छिदुरास्सर्वदेहिनाम्।**
**नश्वराः सहसा जाता जलसङ्क्षोभपीडिताः॥**[3]

द्वादशसर्गे ''उणादयो बहुलम्'' (3.3.1) इति सूत्रादारभ्य उणादिप्रत्ययस्य उदाहरणानि काव्यमार्गेण व्याख्यायन्ते। द्वादशसर्गे युद्धार्थमर्जुनं प्रति रावणस्य दूतप्रेषणं, माहिष्मतीं प्राप्य अर्जुनं प्रति दूतस्य शुकस्य रावणपराक्रमवर्णनपुरःसरं युद्धवार्तायाश्च कथनवर्णने क्तिन्-क्यप्-अङ्-युच्-खल् इत्येते प्रत्ययाः क्रमिकसूत्राणाम् उदाहरणरूपतया अस्माभी रावणार्जुनीये संदृश्यन्ते। अत्र ''इज्यावता''[4] (यज् क्यप्), ''जरावान्''[5] (जॄ अङ्) ''उपासनाम्''(उप-आस् युच् टाप्) ''दुःशासनः'' (दुः शास् युच्), ''दुर्योधनः''[6] (दुर् युध् युच्) इति पदानि युगपत् श्लोकक्रमं सूत्रक्रमञ्च भासयन्ति।

**तद्धितप्रत्ययप्रयोगाः**

रावणार्जुनीयमहाकाव्ये तद्धितप्रत्ययानाम् उदाहरणविषये चत्वारः सर्गाः कविना व्यवहृताः। अष्टाध्याय्याः चतुर्थाध्यायस्य प्रथमद्वितीयपादौ संगृह्य, ङ्याप्प्रातिपदिकपादादारभ्य आरक्तपादं चतुर्दशः सर्गः विनिर्मितः। अत आरभ्य तद्धितप्रत्ययानां सूत्रक्रमानुसारीणि उदाहरणानि श्लोकद्वारा प्रस्तूयन्तेरूपम्। चतुर्थाध्यायस्य तृतीये चतुर्थे च पादे युष्मदस्मत्पादादारभ्य प्राग्वतेष्ठक्पादपर्यन्तं पञ्चदशः सर्गः रचितः। तद्धितप्रत्ययानामुदाहरण-स्थले द्वयोर्द्वयोः पादयोः कृते एकैकः सर्गः रचितरूपः। तथा हि– प्राक्क्रीताच्छपादे धान्यानां पादे च षोडशः सर्गः, प्राग्दिशीयपादे पादशतादिपादे च सप्तदशः सर्गश्च कविना तद्धितोदाहरणार्थं प्रस्तुतः। चतुर्दशे सर्गे कार्तवीर्यसकाशे शुकप्रस्थानम्, माहिष्मतीराजसभायां कार्तवीर्यस्य रावणनिग्रहणे मन्त्रणा इत्यादयो विषयाः ''स्त्रियाम्'' (4.1.1) इत्यधिकृत्य स्त्रीप्रत्ययविषयसूत्राणाम् उदाहरणतया प्रदीयन्ते। तद्यथा रक्षःपक्ष-क्षयार्थमर्जुनस्य प्रतिज्ञायां ''टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्...'' (4.1.15) इत्यादिसूत्रेण ङीप्प्रत्ययः –

**अनश्वरी रात्रीचरेशलावी ममेदृशी चेतसि तावदिच्छा।**
**या वैनतेयीव विहङ्गमूर्तिर्विपक्षनागाङ्गविभङ्गकारी॥**[7]

पञ्चदशे सर्गे अर्जुनेन सह रावणस्य युद्धाय प्रस्थानोपक्रमः, युद्धाद्वारयितुं तत्पत्न्याः मन्दोदर्या अनुनयनम्, तदवज्ञाय प्रतापगर्वितस्य रावणस्य युद्धनिष्क्रमणम् इत्यादिविषयाः मुख्यतया उपन्यस्ताः। युष्मत्-अस्मत् इतिशब्दाभ्यां खञ्-छ इति प्रत्ययद्वयम्, युष्मदस्मदोः स्थाने च युष्माक-अस्माक इत्यादेशविषयेऽप्युदीरितम्। ''युष्मदस्मदोरन्यतरस्याम्''(4.3.1), ''तस्मिन्नणि च युष्माकास्माकौ'' (4.3.2) ''तवकममकावेकवचने'' (4.3.3) इति सूत्रत्रयमत्र श्लोकद्वये व्यवहृतम्, यत्र युद्धाय प्रस्थितानां सैन्यानां परिहासजल्पनं रम्यतया चित्रीयते –

**यौष्माकीणं धनुर्धन्यमास्माकीनमतोऽधिकम्।**
**यौष्माका वाजिनः शूरास्तथास्माका विशेषतः॥**[8]

षोडशे सर्गे रावणार्जुनयोः तुमुलसङ्ग्रामः, तत्र राक्षसपक्षक्षयः, सूर्यास्तसमये समरविरामः इत्यादिविषयाः अष्टाध्याय्याः पञ्चमाध्यायस्य आदिमपादद्वयमाश्रित्य श्लोकतया रचितरूपाः। अत्र सूत्रक्रममनुसृत्य ''प्राक्क्रीताच्छः'' (5.1.1) इत्यधिकृत्य ''उगवादिभ्यो यत्'' (5.1.2) इत्यनेन यत्, ''तस्मै हितम्'' (5.1.5), ''तदर्थं विकृतेः प्रकृतौ'' (5.1.12) इत्यनेन छ–प्रत्ययस्य उदाहरणं प्रसङ्गानुसारितया प्रस्तुतम्।

**समासप्रयोगाः**

रावणार्जुनीये चतुर्थसर्गे ''समर्थः पदविधिः'' (2.1.1) इति सूत्रादारभ्य समासविषयकैः सूत्रैः मृगयातः प्रत्यावर्तितस्य अर्जुनस्य पुरनारीभिः साकं स्नानयात्रा तत्सन्दर्भे कमलनयनाः पुरसुन्दर्यः नर्मदा च तटिनी सप्रसङ्गमुपवर्णिताः। अस्मिन्नवसरे अव्ययीभाव-तत्पुरुष-बहुव्रीहिसमासाः यथासूत्रक्रममुदाहृताः। पूर्वादिपादे पञ्चमसर्गे सूर्यास्तवर्णनं सन्ध्याचित्रणञ्च विहितम्। पुनः द्विगुपादे सप्तमे सर्गे अष्टाध्याय्या द्वितीयाध्यायस्य चतुर्थपादस्थसूत्राणि द्विगुरेकवचनमित्यारभ्य समाहारद्वन्द्वसमासः वैकल्पिकः एकवद्भावश्च यथाक्रममुदाह्रियन्ते। नृपतेरन्तःपुरप्रवेशप्रसङ्गे पुरनारीणां वर्णने अव्ययीभावसमासस्य ''अव्ययं विभक्ति-समीप–समृद्धि-वृद्ध्यर्थाभावात्ययासम्प्रति-शब्दप्रादुर्भाव-पश्चाद्यर्थानुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्तवचनेषु'' (2.1.6) इति प्रधानसूत्रं विभक्त्यर्थे ''अधिस्त्रि'', समृद्ध्यर्थे ''सुनारि'',[9] सादृश्यार्थे ''सलक्ष्मिमूर्तिम्''[10] इति पदानि निरूपयति। प्रसन्नसलिला रेवा जनानां जननीवदासीदित्यत्र ''पूर्व-सदृश-समोनार्थकलहनिपुणमिश्रश्लक्ष्णैः'' (2.1.31) इति सूत्रमुदाहृतम् –

**त्रिकल्पपूर्वा सरितां वरा या राज्ञां तमोभित्सदृशेन युक्ता।**
**कालुष्यभिन्ना जननीसमा या झषोर्मिमालाकलहान् वहन्ती॥** (4.19)

महाकाव्यस्य पञ्चमसर्गे सूर्यास्तमयवर्णनसमये षष्ठीतत्पुरुषसमासप्रतिषेधसूत्रं प्रसङ्गानुकूलतया उदाहृतम्- ''न निर्धारणे'' (2.2.20), ''याजकादिभिश्च'' (2.2.9) इत्यनेन सूत्रेण-

**अम्भःपरिचारिका द्विरेफा विज्ञायाहितसम्भ्रमान् भ्रमन्तः।**
**यासत्कुसुमाः कुमुद्वतीनां सम्पन्नाष्टिकसौरभा ययुस्ताः॥**[11]

रावणार्जुनीयस्य सामासिकप्रयोगविषये सप्तमसर्गे प्रतिनायकस्य रावणस्य राजसभायां

प्रत्यावर्तितेन चारमण्डलेन कार्तवीर्यस्य ऐश्वर्यस्य वर्णनम्, तदाकर्ण्य क्रुद्धस्य रावणस्य अर्जुनविजयार्थं माहिष्मतीं प्रति प्रस्थानमित्यादिविषयाः अष्टाध्याय्याः द्वितीयाध्यायस्य चतुर्थपादस्थसूत्राणि ''द्विगुरेकवचनम्'' (2.4.1), ''द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्'' (2.4.2) इति सूत्रक्रममाश्रित्य समाहारद्वन्द्वसमासस्य वैकल्पिकैकवद्भावस्य चोदाहरणदर्शनसनाथेन वर्णिताः रावणस्य चारमण्डलचित्रणे –

**दिवानिशं परिक्रम्य काकोलूकमिवावनौ।**
**मन्यमानं जनं भर्तुः सदा कीटपिपीलिकम्॥**[12]

वैकल्पिकः एकवद्भावप्रयोगः अपि अस्मिन्नेव सर्गे उदाहृतं कार्तवीर्यार्जुनस्य प्रतापवर्णने –

**यस्य बाहुबलत्रस्ताः सिंहव्याघ्रा वनेष्वपि।**
**मांसं मृगवराहस्य विस्रब्धाः स्म न भुज्यते॥**[13]

''अलुगुत्तरपदे'' (6.3.1) इति सूत्रादारभ्य अलुक्समासविधायकानि समासादेश-विषयकाणि सूत्राणि एकोनविंशसर्गे सहस्रार्जुनदशाननयोः ससैन्ययुद्धवर्णनं चित्रयन्ति। अत्र अप्रचलितप्रत्ययोदाहरणैः रक्षःसैन्यानां ध्वंसक्रियाकारित्वं सहस्रार्जुनेन तस्य प्रतिरोधश्च शोभनं चित्रीयते। तद्यथा अलुक्समासस्य उदाहरणम्- ''पञ्चमी स्तोकादिभ्यः'' (6.3.2) इत्येनन पञ्चम्या अलुक्- ''स्तोकाद्गतम्'', ''ओजः सहोम्भस्तमसस्तृतीयायाः'' (6.3.3) इत्यनेन सप्तम्याः अलुक्-''सहसात्तकोपः'',[14] ''प्रावृट्शरत्कलादिवां जे'' (6.3.14) इत्यनेन सप्तम्याः अलुक्-''शरदिजाम्बुजभास्करवत्''[15] इति च। रावणार्जुनीयस्य सप्तदशसर्गे मन्दोदर्याः विरहकालिकावस्थाख्यापने तद्विशेषप्रकाशने ''संख्यासुपूर्वस्य'' (5.4.140) इत्यनेन अकारलोपेन ''सुपात्''[16], ''गन्धस्येदुत्पूतिसुसुरभिभ्यः'' (5.4.135) इत्यनेन इत्-आदेशेन ''उद्गन्धिपुष्पाणि'',[17] ''धनुषश्च'' (5.4.132) इत्यनेन अनङादेशेन ''पिनाकधन्वनः''[18] इत्यादीनि पदानि यथाप्रसङ्गं काव्यचमत्कृतिं वितन्वन्ति। महाकवेरियं सार्थकता यत् व्याकरणसूत्राणाम् उदाहरणप्रयत्नेन प्रसङ्गानुसारिणः काव्यिकप्रयोगस्य विधानम्। ग्रन्थस्य यथासाध्यसमीक्षणानन्तरम् एते विचाराः बुद्धिपथमागच्छन्ति।

**कारकविभक्तिप्रयोगाः**

प्रथमाध्यायचतुर्थपादे विनिर्मिते तृतीयसर्गे माहिष्मत्या निर्गतस्य राज्ञो वनमृगयाविहारप्रसङ्गे कारकसूत्राणि यथाक्रममुदाहरितानि। पुनः द्वितीयाध्यायतृतीयपादे ''अनभिहिते'' (2.3.1)

इति सूत्रमधिकृत्य चन्द्रोदयवर्णनविप्रलम्भवर्णनावसरे विभक्तिविधायकानि पाणिनिसूत्राणि श्लोकरूपतया प्रयुक्तानि। तद्यथा– अपादानकारकस्य उदाहरणावसरे एकस्मिन्नेव गजराजविषये तस्य अवयवादिकं लक्ष्यीकृत्य विविधमपादानत्वं प्रयुक्तम् –

**रेणूच्चयात् पथि पराजयते स्म कश्चिदन्तर्दधे करिवरादपरोऽश्वसादी।**
**जातं कपोलफलकान्मदवारि तस्माद् भृङ्गान्न्यवारयदिभश्चलकर्णतालः॥**[19]

एवञ्च कारकसूत्राणां कार्तवीर्यमृगयाप्रसङ्गे उदाहरणप्रदर्शने अभिनवा दृष्टान्ताः लक्ष्यन्ते। तद्यथा, तुरगखुरवेगात् भूमितलात् ऊर्ध्वमार्गे रेणूच्चये भूमेः अपादानत्वं कल्पितम्। अत्र अपदानत्वे हेतुः भूमेः ध्रुवत्वम्। एकस्मिन् हस्तिप्रसङ्गे मदवारिनिःसरणे कपोलस्य जनिकर्तृप्रकृतित्वेन अपादानत्वम्, पुनश्च चलत्कर्णाभ्यां मदवारितः भ्रमरनिवारणे मदवारिण ईप्सितत्वेन अपादानत्वम्। रजःप्रादुर्भावात् राजमातङ्गात् अश्वारोहिणः अन्तर्धान-प्रयत्ने राजमातङ्गस्य अपादानत्वम्, अदर्शनविषयत्वात्। एकस्मिन्नेव प्रसङ्गे परस्परसम्बद्धान् विषयांशान् अवलम्ब्य तत्र तत्र कारकत्वं प्रयुक्तं भट्टभीमेन। अत्र अपादानकारकस्य सूत्राणि यथाक्रमं यथाप्रसङ्गञ्च एकस्मिन्नेव श्लोके प्रयुज्यन्ते- ''पराजेरसोढः'' (1.4.26) ''वारणार्थानामीप्सितः'' (1.4.27), ''अन्तर्धौ येनादर्शनमिच्छति'' (1.4.28), ''जनिकर्तुः प्रकृतिः'' (1.4.30) इति च।

षष्ठसर्गे अष्टाध्याय्याः द्वितीयाध्यायस्य तृतीयपादस्य सूत्राण्यादाय द्वितीया-तृतीया-पञ्चमी-षष्ठी-सप्तमीपर्यन्तं प्रायः सर्वाणि विभक्तिविधायीनि पाणिनिसूत्राणि काव्यात्मकतया उदाह्रियन्ते, यत्र कारकजन्या उपपदजन्या चोभयप्रकारा विभक्तिः चन्द्रोदयविप्रलम्भ-रात्रिक्रीडादिवर्णनावसरे प्रयुक्ता लक्ष्यन्ते। तत्र ''यतश्च निर्धारणम्'' (2.3.41) सूत्रेण निर्धारणावधौ 'निशानाम्' 'स्त्रीषु' इत्यनयोः षष्ठीसप्तम्योः वैकल्पिकविधानम् –

**लब्धा युवानो विहतान्धकारां निशां निशानां परमां सचन्द्राम्।**
**सुहृत्समेताः रमयाम्बभूवुः सयौवनाः स्त्रीषु मनोहरा याः॥**[20]

अत्र शास्त्रकाव्यसीमानमतिक्रम्य काव्यत्वावच्छिन्नरूपेण रावणार्जुनीयं साहित्यिकोपकरणैः संवर्धमानं दृश्यते। एवमेव रावणार्जुनीयस्य तृतीयाध्यायस्य प्रथमपादमाश्रित्य सर्गद्वयं रचितम्, पादस्य आकारगौरवात्। प्रत्ययपादपूर्वार्धे विनिर्मिते अष्टमे सर्गे अष्टाध्याय्याः प्रथमाध्यायस्य कियत्सूत्राणि श्लोकरूपतां प्राप्तानि। उत्कृष्टैरात्मगुणैः ऐन्द्री अमरावतीव अर्जुनीया माहिष्मती सर्वेषामधिवासिनाम् एकमात्रशरणरूपा –

**सुखायमानेन जनेन युक्ता दुःखायमानस्य जनस्य ढौका॥**[21]

नामधातोरनन्तरम् इतराः कतिचनप्रत्ययाः प्रसङ्गक्रमतः उदाहृताः। लृट्-लिट्-लुङ् इत्यादि-लकाराणां प्रयोगाः रावणस्य दूतं प्रति वचनप्रकारे लभ्यन्ते। स्वप्रतापं प्रति लङ्काधिपतेः सचेतनत्वं, गुप्तचरैः कर्मिजनैः आत्मीयलोके तस्य प्रबोधनं ''उषविदजागृभ्यो-ऽन्यतरस्याम्'' (३.१.३८) इत्यनेन जागृधातोः लिटि विकल्पेन आम्प्रत्ययविधानेन 'जागराम्बभूव', 'प्रजजागार' पदद्वयेन सम्भासते। नवमसर्गे नर्मदावर्णनं मुख्यम्, सार्वधातुके विकरणप्रत्ययविधानमारभ्य तदनन्तरं कृदधिकारे प्रारब्धे कृत्प्रत्ययस्य उदाहरणैः प्रत्ययपादपश्चार्धनामकः नवमसर्गः सज्जितः। भ्वादि-अदादि-दिवादिप्रभृतिगणीयधातूनां शप्-यक्-श्यन्-श्लुविकरणप्रत्ययविधायकानां सूत्राणाम् प्रसङ्गानुसारीणि उदाहरणानि रचयामास महाकविः –

**इयमद्रिपतेः सुरापगेव प्रभवत्यम्बुविधूतलोकपापा।**
**पवनोच्चलितैर्जलैः स्पृशन्ती तटजातैः सह दीव्यतीव वृक्षैः॥**[२२]

## मूल्यायनम्

रावणार्जुनीयस्य समीक्षणानन्तरं अस्माभिः दृश्यते यत् अष्टाध्यायीसूत्रक्रममाश्रित्य काव्यस्य परिधिः वितन्यते। अष्टाध्याय्याः अध्यायानां यादृशानि सूत्राणि क्रमतः वर्तन्ते, तानि अवलम्ब्य महाकाव्यस्य श्लोकाः रचिताः। सूत्राणां प्रकृतिः श्लोकस्य प्रकृतिजनयित्री। यथा तद्धितप्रत्ययानाम् उदाहरणावसरे रावणस्य उग्रस्वभाववर्णनम्, कारकसूत्राणामुदाहरणैः नृपतेः ससैन्यमृगयायात्रावर्णनम्, समाससूत्राणाम् उदाहरणैः प्रकृतिवर्णनम्, कृत्यप्रत्ययानां प्रयोगैः राक्षसानां उपद्रवकारित्वम्, रावणकृतं शिवस्तवनम्, नामधातुप्रयोगैः माहिष्मत्याः वर्णनम्, अलुक्समासोदाहरणैः रावणार्जुनयोः तुमुलसमर-वर्णनम् इत्यादिविषयाः सूत्राणां क्रमं प्रकृतिं चाश्रित्य क्रियतेरूपम्। इत्थं, महाकाव्यस्य कथानकानुसारं वस्तुपात्रविषयचरित्रादीनामेव भिन्नभिन्नसन्दर्भेषु भिन्नभिन्नाधानेषु भिन्नभिन्नमुदाहरणं प्रस्तुतम्। अत्र कवेः नैसर्गिकवर्णननैपुण्यं वैयाकरणवैदग्ध्यञ्च युगवत् प्रतिफलितम्। किञ्च न केवलं तथा, तस्मिन्नेव क्रमे क्रमिकसूत्राणां निर्दिष्टतया अवस्थानत्वात्, कवेः मौलिकरचनचातुर्यञ्च व्याकरणनिर्भरः भवितुं शक्येत इति चेत्तन्न, कविवैयाकरणस्य काव्यव्याकरणयोः उभयत्र तुल्यपाटवात्। इदमेवात्रावितथं कथ्यं यत्, महाकविना भट्टभीमेन अनुसृतेऽपि भट्टिकवौ, तस्य नावीन्येन संस्कृतकाव्यसाहित्यपरम्परा नूनं संवर्ध्यते। सूत्रक्रममनुसरता कविवरेण प्रसङ्गानुकूलतया सर्गविभाजनमकारि, तस्मिन् तस्मिन् च सर्गे वर्ण्यविषयाश्च तथा उपन्यस्ताः। सूत्रप्रकृतिं चिन्तं चिन्तमुदाहरणतया तदनुकूलं श्लोकानपि क्वचिदरचयन्महाकविः। सूर्यास्तवर्णनं सन्ध्यावर्णनमित्यादिक्षेत्रे

सत्यामपि व्याकरणपक्षस्य अनिवार्योपस्थितौ, तत्र कवेः काव्यचमत्कारिता अक्षुण्णतया चकास्ति।

अतो महाकाव्यस्यास्य राजस्नानमृगयायात्रादिकथानकवर्णनात्मकत्वेन काव्यत्वम्, क्रमेण सूत्रोदाहरणात्मकतया च शास्त्रत्वमपि सिध्यतीति दिक्।

*

**सन्दर्भाः–**


1. रावणार्जुनीयम् 9.37
2. तत्रैव, 10.23
3. तत्रैव, 11.44
4. तत्रैव, 12.30
5. तत्रैव, 12.32
6. तदैव, 12.43
7. तदैव, 14.5
8. तत्रैव, 15.1
9. तत्रैव, 4.1
10. तत्रैव, 4.4
11. तत्रैव, 5.12
12. तत्रैव, 7.8
13. तत्रैव, 7.12
14. तत्रैव, 19.1
15. तत्रैव, 19.8
16. तत्रैव, 17.76
17. तत्रैव, 17.80
18. तत्रैव, 17.78
19. तत्रैव, 3.1
20. तत्रैव, 6.60
21. तत्रैव, 8.14
22. तत्रैव, 9.2


*

# ‘कर्मधारय’संज्ञासूत्रसमीक्षणम्

**डा. मलयपोडे**

### 1.1. उपोद्घातः

संस्कृताख्यां वाचम् आश्रित्य विरचितेषु व्याकरणशास्त्रेषु पाणिनीयव्याकरणं लोकवेदोभयोपकारकत्वाद् अतीव प्राधान्यं भजते। तत्र मुख्यः ग्रन्थो भवति पाणिनिप्रणीतः अष्टाध्यायीनामकः सूत्रग्रन्थः। तत्र द्वितीयाध्याये ‘समर्थः पदविधिः’ (2.1.1) इत्यारभ्य समासविधायकानि सूत्राणि वर्णितानि। सामान्यतया हि समासः चतुर्धा विभज्यते अव्ययीभावः, तत्पुरुषः, बहुव्रीहिर्द्वन्द्वश्च। तत्र तत्पुरुषसमास-विधायकानां सूत्राणां समीक्षणेन तत्पुरुषसमासस्य बहवः प्रकारा इति ज्ञायन्ते। तेषु प्रकारेषु अन्यतमः भवति कर्मधारयः। ततः कीदृशः तत्पुरुषः कर्मधारय इति जिज्ञासायां सूत्रं प्रवृत्तं ‘तत्पुरुषः समानाधिकरणः कर्मधाारयः’ (1.2.42) इति। एतस्य सूत्रस्य विचारः अधः समुपन्यस्यते–

### 1.2 सूत्रार्थः

सूत्रमिदं कर्मधारयसंज्ञाविधायकम्। अत्र तत्पुरुषः समानाधिकरणः कर्मधारयः इति पदत्रयं प्रथमैकवचनान्तम्। समानाधिकरणः तत्पुरुषः इति संज्ञिदलं कर्मधारयः इति च संज्ञापदम्। समानम् एकम् अधिकरणं ययोः ते समानाधिकरणे पदे इति बहुव्रीहिसमासः। अधिकरणं नाम वाच्यम् अभिधेयम्। समानाधिकरणे इत्यस्य समानाभिधेये इत्यर्थः। समानाधिकरणे पदे स्तः अस्येति विग्रहे अर्शआदित्वाद् मत्वर्थीये अच्प्रत्यये समानाधिकरणशब्दः निष्पन्नः। समानाधिकरणः नाम समानाधिकरणपदकः। समानाधिकरणः इति पदस्य अयं व्युत्पत्तिपक्षः बालमनोरमायां तत्त्वबोधिन्यां च प्रतिपादितः। एवम् अस्य सूत्रस्यार्थः– ‘**समानाधिकरणानेकपदावयवकः तत्पुरुषः कर्मधारयसंज्ञः स्यात्**’[1] इति।

तत्पुरुषस्य कर्मधारयसंज्ञायां पुंवद्भावकार्यादिकं फलम्। तेन कृष्णा चतुर्दशी इति विग्रहे ‘**पुंवत्कर्मधारयजातीयदेशीयेषु**’ (6.3.42) इत्यनेन सूत्रेण कर्मधारयसमासे कृष्णा इत्यस्य पुंवद्भावे कृष्णचतुर्दशी इति रूपम्। कर्मधारयसंज्ञकस्य तत्पुरुषसंज्ञा अप्यभीष्टा। अत एव ‘**आकडारादेका संज्ञा**’ (1.4.1) इति सूत्रस्याधिकारे अस्य सूत्रस्य पाठो न विहितः।

**1.3. सूत्रविचारः**

**'तत्पुरुषः समानाधिकरणः कर्मधारयः'** (1.2.42) इति सूत्रस्य विचारः महाभाष्यकारादिमतपरिशीलनेन अधः विधीयते।

**1.3.1 महाभाष्यकारस्य अभिमतम्–** अस्य सूत्रस्य व्याख्यावेलायां '**तत्पुरुषः समानाधिकरणपदः कर्मधारयः**' इति न्यासान्तरं महाभाष्ये प्रस्तुतम्। न्यासान्तरं नाम सूत्रकारप्रोक्ताद् रूपात् सूत्रस्य अन्यद् रूपम्।

**(क) समानाधिकरणः इत्यंशे दोषः–** समानाधिकरणः इति पदस्य व्युत्पत्तिं कुर्वन्ति आक्षेपवादिनः–समानम् अधिकरणं यस्य स समानाधिकरणः इति विग्रहे बहुव्रीहिः इति। एवं स्वीकारे तत्पुरुषः समानाधिकरणः कर्मधारयसंज्ञको भवति इति वचनं न सिध्यति। समासे एकार्थत्वं सम्पद्यते। एकार्थविशिष्टे तत्पुरुषे सामानाधिकरण्यं नैव सम्भवति। अतः तत्पुरुषस्य समानाधिकरणत्वाभावात् कर्मधारयसंज्ञा एव न सिध्यति। अत एवोक्तम् आक्षेपवार्तिकं भाष्ये **तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिः**[2] इति।

**अस्य वार्तिकस्य भाष्यम्–** 'तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वात् संज्ञाया अप्रसिद्धिः। एकोऽयमर्थस्तत्पुरुषो नाम। अनेकार्थाश्रयं च सामानाधिकरण्यम्।'[3] इति।

समासैकार्थत्वादित्याद्यस्य तात्पर्यं स्पष्टयति रत्नप्रकाशकारः यत् समासे यः अर्थः स एक एव भवति किन्तु सामानाधिकरण्ये हि अनेकाश्रितमिति पार्थक्यम्।[4]

**सामानाधिकरण्यलक्षणं स्पष्टयति प्रदीपे कैयटः–** 'भिन्नप्रवृत्तिनिमित्त–प्रयुक्तस्यानेकस्य शब्दस्य एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमुच्यते।'[5] इति।

उद्द्योते नागेशः कथयति– सामानाधिकरण्यलक्षणे पर्यायव्यावृत्त्यर्थमेव कैयटेन भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्य इति पदं प्रदत्तम्। एतस्यार्थः तावत् भिन्नप्रवृत्तिनिमित्तप्रकारकभिन्नोपस्थितिजनकस्य इति। **'नामन्त्रिते समानाधिकरणे'** (8.1.73) इति सूत्रभाष्यदिशा कोशे च पर्यायाणामपि सामानाधिकरण्यस्य इष्टत्वात् सामानाधिकरण्यलक्षणे भिन्नेत्यादिपददानं चिन्त्यम् अर्थाद् असङ्गतमिति उद्द्योते नागेशः।[6]

यथा नीलम् उत्पलम् इत्यत्र सामानाधिकरण्यमस्ति परन्तु तत्पुरुषसमासत्वं नास्ति। नीलोत्पलम् इति तत्पुरुषसमासे नीलपद्मरूपस्य एकस्य अर्थस्य उपस्थितेः नास्ति सामानाधिकरण्यम्। तथाह्युक्तं प्रदीपे कैयटेन–'नीलोत्पलादिश्च तत्पुरुष एक एवेति

सामानाधिकरण्यम् अनुपपन्नम्। वर्तिपदानां तु सामानाधिकरण्यमुपपद्यते, तत्पुरुषत्वं तु तेषां नास्ति।'[7] इति।

तथाहि नागेशस्य मतम् उद्द्योते– 'यद्येकविशेष्यकप्रतीतिजनकत्वं सामानाधिकरण्यं तदा तत्पुरुषमात्रस्य कर्मधारयत्वापत्तिः समानाधिकरणपदवैयर्थ्यं चेति तात्पर्यम्।'[8] इति।

**( ख ) दोषनिवारणाय न्यासान्तरस्वीकारः –** एवं च तत्पुरुषस्य एकार्थत्वात् सामानाधिकरण्यभावाच्च कर्मधारयसंज्ञा न स्यादिति दोषः। एतस्य दोषस्य समाधानाय भाष्यकृता न्यासान्तरसमाधानवार्तिकं प्रस्तुतं '**सिद्धं तु पदसामानाधिकरण्यात्**'[9] इति।

अर्थात् '**तत्पुरुषः समानाधिकरणः कर्मधारयः**' (1.2.42) इति सूत्रस्य स्थाने '**तत्पुरुषः समानाधिकरणपदः कर्मधारयः**' इति न्यासान्तरं कल्पनीयम्। समानम् अधिकरणं येषां तानि समानाधिकरणानि इति बहुव्रीहिः। अधिकरणं नाम विभक्तिः। समानाधिकरणानि पदानि यस्य स समानाधिकरणपदः इति बहुव्रीहिः। एवं च 'यस्य तत्पुरुषस्य समानाधिकरणानि पदानि सन्ति तस्यैव कर्मधारयसंज्ञा भवति' इति न्यासान्तरस्य अर्थः समायाति। तेन नीलोत्पलम् इति तत्पुरुषसमासे नीलम् उत्पलम् इति घटकयोः समानाधिकरणयोः पदयोः सत्त्वात् कर्मधारयसंज्ञा भवतीति समासस्य एकार्थत्वं समानाधिकरणपदत्वं च सुरक्षितम् इति दोषाभावः।

**( ग ) सूत्रपक्षस्वीकारः–** न्यासान्तरस्य स्वीकारे दोषो यद्यपि निरस्तो भवति तथापि सूत्रभेददोष आपद्यते। अतः यथान्यासं सूत्रमेव स्वीकार्यमिति सूत्रपक्षवादिनां मतम्। सूत्रस्वीकारे 'तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिः' इति यः दोषः प्रदत्तः स वस्तुतो नास्त्येव। अतः दोषनिवारणं तावदुच्यते महाभाष्ये – 'नैष दोषः। अयं तत्पुरुषोऽस्त्येव प्राथमकल्पिको यस्मिन्नैकपद्यम् ऐकस्वर्यमेकविभक्तित्वं च। अस्ति तादर्थ्यात्ताच्छब्द्यं तत्पुरुषार्थानि पदानि तत्पुरुष इति। तद्यस्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणम्।'[10] इति।

**तत्पुरुषशब्दः द्विविधः –** मुख्यो गौणश्च। तत्र समासपरकः यो मुख्यः तत्पुरुषः तत्र तु ऐकपद्यम् ऐकस्वर्यम् एकविभक्तिकत्वं च अस्ति। ऐकपद्यं नाम एकार्थत्वम् एकपदत्वं वा। पदशब्दस्य अर्थः इत्यर्थस्वीकारेण एकार्थत्वम् इति सिध्यति। अथवा समासे सञ्जाते तस्माद् विभक्त्युत्पत्तौ एकपदत्वमेव समासस्य। एकविभक्तिकत्वं नाम एककारकत्वम् इति। यथा नीलोत्पलम् इति तत्पुरुषः इति मुख्यो व्यवहारः।

नीलोत्पलम् इति तत्पुरुषे तत्पुरुषार्थेषु नीलम् उत्पलम् इत्यादिषु पदेषु तत्पुरुषः

इति व्यवहारः गौणः। अत्र 'तादर्थ्यात् ताच्छब्द्यम्' इति न्यायेन तत्पुरुषार्थानि यानि पदानि सन्ति तेषां तत्पुरुषः इत्यभिधानम्। एवं तत्पुरुषार्थानि पदानि तु समानाधिकरणानि भवन्ति। अतः तत्पुरुषः इत्यस्य विशेषणत्वात् समानम् अधिकरणं यस्य स समानाधिकरणः इति विग्रहः। समानविभक्तिकः इत्यर्थः। एवञ्च कर्मधारयसंज्ञायां नास्ति दोषः।

अत्र उद्द्योते नागेशः – 'ततो हेतोर्मुख्यार्थे सामानाधिकरण्यासम्भवाद् हेतोः यस्तादर्थ्यात्तच्छब्दस्येदं ग्रहणमित्यक्षरार्थः। यद्वा यस्तादर्थ्यात् ताच्छब्द्यं तच्छब्दवाच्यतां लभते इति शेषः।'[11] इति।

**'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः'** इति न्यायेन मुख्यस्य तत्पुरुषस्य पदान्तरेण शोभनः राजपुरुषः इत्यादौ सामानाधिकरण्यं सम्भवति, परन्तु कथमत्र सूत्रे गौणस्य ग्रहण-मिति प्रश्नः। अत्र हि अन्तरङ्गं कार्यं बलवद् भवति। तत्पुरुषसमासघटकानि यानि पदानि तेषां सामानाधिकरण्यम् अन्तरङ्गम्। तत्पुरुषस्य पदान्तरेण सामानाधिकरण्यं बहिरङ्गम्।

अत्र नागेशः उद्द्योते प्राह – 'अर्थनिबन्धसामानाधिकरण्याश्रयोऽन्तरङ्गन्यायस्तु तत्पुरुषशब्दमात्राश्रयगौणमुख्यन्यायात् प्रबलः।'[12] इति।

अत्र पुनः एकस्य प्रश्नस्यावसरो भवति यत् समानम् अधिकरणं येषां तानि समानाधिकरणानि इति कृत्वा ततः अर्शआदित्वाद् मत्वर्थीये अच्प्रत्यये समानाधिकरणः इति पदं निष्पन्नम् इति कथं न स्वीकृतम्? अत्रोत्तरं नागेशेन प्रोक्तं – **'समानाधिकरणपद-मर्शआद्यजन्तं तु नाश्रितं, तादृशानामपि गौणत्वात्'**[13] इति।

अत्र तत्पुरुषसमासघटकानां पदानां कर्मधारयसंज्ञा विधीयते। सा संज्ञा च 'समुदाये वाक्यपरिसमाप्तिः' इति न्यायेन समुदाये वाक्यपरिसमाप्त्या पदसमुदायस्य समासस्यैव भवति। एवं तत्पुरुषार्थानि यानि समानाधिकरणानि पदानि तेषां या कर्मधारयसंज्ञा सा तत्पुरुषसमासस्य भवति। अस्याः संज्ञायाः तत्पुरुषाधिकारे पाठो नास्ति। अन्यथा **'आकडारादेका संज्ञा'** (1.4.1) इति अधिकारात् तत्पुरुषसंज्ञाया अनया संज्ञया बाधः स्यात्। तथाहि प्रदीपे कैयटः – **'तत्पुरुषसंज्ञाप्रकरणे इयं संज्ञा न कृता, एकसंज्ञाधिकारात् तत्पुरुषसंज्ञाया बाधो मा भूदिति।'**[14] इति। सूत्रपक्षे दोषाभावात् **'तत्पुरुषः समानाधिकरणपदः कर्मधारयः'** इति न्यासान्तरस्य नास्ति प्रयोजनम्, **'तत्पुरुषः समानाधिकरणः कर्मधारयः'** (1.2.42) इति सूत्रमेव साधु इति महाभाष्यकारस्य आशयः।

1.3.2. उद्द्योतकारस्य स्वकीयं मतम् – नागेशभट्टः उद्द्योते सूत्रविषये

विशिष्टं स्वमतं प्रास्तौत्। तस्य मते 'तत्पुरुषः समानाधिकरणः कर्मधारयः' (1.2.42) इत्यस्य स्थाने 'समानाधिकरणः कर्मधारयश्च' इति सुवचं 'द्विगुश्च' (2.1.23) इति सूत्रवत्। 'द्विगुश्च' इत्यत्र चकारेण यथा द्विगुः तत्पुरुषः इति संज्ञाद्वयस्य एकस्मिन् समावेशः तथैव 'समानाधिकरणः कर्मधारयश्च' इत्यनेन समानाधिकरणस्य तत्पुरुषः कर्मधारयः इति संज्ञाद्वयं विधीयते। एवं नागेशभट्टेन 'समानाधिकरणः कर्मधारयश्च' इति अन्यदेव न्यासान्तरं प्रत्यपादि इति वक्तुं शक्यते। अत एवोक्तम् उद्द्योते – 'समानाधिकरणः कर्मधारयश्चेति तु सुवचं द्विगुश्चेतिवत्।'[15] इति।

1.3.3. उद्द्योतनकारस्य स्वकीयं मतम् – एवमेव उद्द्योतनकारः अन्नम्भट्टः अपि उद्द्योतने विशिष्टं मतं प्रस्तुतवान्। तस्य मतानुसारेण **'पूर्वकालैक-सर्वजरत्पुराणनवकेवलाः समानाधिकरणेन'** (2.1.49) इति समानाधिकरणप्रकरणस्य अन्तिमे 'कर्मधारयः' इति सूत्रं कार्यम्। तस्य अर्थो भवति – 'यः अयं समानाधिकरणः तत्पुरुषो विहितः स कर्मधारयसंज्ञः स्यात्' इति। गुरुसूत्रस्य करणे नास्ति प्रयोजनम्। ततः कर्मधारयस्य तत्पुरुषसंज्ञाविधानाय 'द्विगुश्च' (2.1.23) इति सूत्रस्य स्थाने 'द्विगुकर्मधारयौ च' इति सूत्रं कार्यम्। एतस्य च सूत्रस्यार्थो भवति– 'द्विगुः कर्मधारयः च तत्पुरुषसंज्ञः अपि स्यात्' इति। तथाहि प्रतिपादितम् उद्द्योतने – 'अत्र 'पूर्वकालैक' इत्यादि–समानाधिकरणप्रकरणान्ते 'कर्मधारयः' इत्येतावत् सूत्रं कर्तव्यम् – योऽयं समानाधिकरणस्तत्पुरुषो विहितः स कर्मधारय इति। ततश्चैतद् गुरु सूत्रं न कर्तव्यम्। तत्पुरुषसंज्ञासमावेशार्थं 'द्विगुश्च' इति सूत्रं 'द्विगुकर्मधारयौ च' इति कर्तव्यमिति लाघवसम्भवे तथा तु न कृतमित्येव समाधानम्।'[16] इति।

1.3.4 काशिकाकारस्य स्वकीयं मतम् – काशिकायां वामनजयादित्याभ्यां विशिष्टं मतं प्रस्तूयते। तत्र सूत्रवृत्तौ प्रतिपादितं – 'तत्पुरुषः इति समासविशेषस्य संज्ञां वक्ष्यति। स तत्पुरुषः समानाधिकरणपदः कर्मधारयसंज्ञो भवति। अधिकरणशब्दोऽभिधे-यवाची। समानाधिकरणः समानाभिधेयः।'[17] इति। तेन तन्नये तत्पुरुषः इत्यस्य सूत्रस्थस्य पदस्य मुख्यार्थे समाससंज्ञायामेव प्रयोगः। सामानाधिकरण्यं नाम अनेकस्य शब्दस्य भिन्नप्रवृत्तिनिमित्तस्य एकस्मिन्नर्थे वृत्तिः। तेन यत्र तत्पुरुषस्य बाह्येन पदेन सह सामानाधिकरण्यं तत्रैव राजपुरुषः शोभन इत्यादौ एव कर्मधारयः स्यात् पाचकवृन्दारिका इत्यादौ न स्यादिति दोषः। अतः अत्रोच्यते समानाधिकरणशब्दस्य गौणार्थे समानाधिकरणपदः इत्यर्थे प्रयोगः। समानम् अधिकरणं येषां तानि समानाधिकरणानि पदानि, तानि आश्रित्य यः तत्पुरुषः स समानाधिकरणपदः। तत्पुरुषार्थानां पदानां यथा

सामानाधिकरण्यं तथा उपचारात् तत्पुरुषस्यापि इति समानाधिकरणः इति पदस्य गौणार्थे प्रयोगः।

तथाह्युक्तं न्यासटीकायां जिनेन्द्रबुद्धिना – 'समानम् अभिन्नम् एकम् अधिकरणं वाच्यं येषां पदानां तानि समानाधिकरणानि पदानि, तान्याश्रयभूतानि यस्य तत्पुरुषस्य स समानाधिकरणपदस्तत्पुरुषः। एतेन तत्पुरुषार्थानां पदानां समानाधिकरणत्वादुपचारेण तत्पुरुषोऽत्र सूत्रे समानाधिकरणशब्देनोक्त इति दर्शयति।'[18] इति।

लाघवाय संज्ञा विधीयते परन्तु अत्र टिघुप्रभृतिवत् लघुसंज्ञां न कृत्वा यत् कर्मधारय इति महासंज्ञां करोति तस्य विशेषप्रयोजनं विद्यते। तेन सूत्रे गौणमुख्यन्यायस्य प्रवृत्तिः न भवति। अत एव सूत्रे समानाधिकरणः इति गौणस्य समानाधिकरणस्य ग्रहणं न मुख्यस्य इति न्यासकारः। अत एवोक्तं न्यासटीकायाम्– 'इह हि लाघवार्थत्वात् संज्ञाकरणस्य, लघीयस्यां संज्ञायां कर्तव्यतायां कर्मधारय इति महतीं संज्ञां कुर्वता – 'अन्योऽप्यत्र कश्चिद् विपर्ययः संज्ञायामाश्रितः' इत्येषोऽर्थः सूचितः। तेन 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति मुख्यस्य समानाधिकरणस्य ग्रहणं न विज्ञायते।'[19] इति।

महाभाष्ये सिद्धान्तत्वेन यत् प्रतिपादितं तत्पुरुषः इति गौणः समानाधिकरणः इति मुख्यः व्यवहारः इति तत् न अङ्गीकुर्वन्ति काशिका–न्यास–पदमञ्जरीकारादयः। अत एव न्यासकार आह – 'अन्ये त्वाहुः – तत्पुरुषार्थानि पदानि तत्पुरुषशब्देनोक्तानीति। तेषामेवैषा संज्ञेत्युक्तं भवति। एतत्तु वृत्तिकारस्यानभिमतम्, यतस्तत्पुरुष इति समासविशेषस्य संज्ञां वक्ष्यति, स तत्पुरुषः समानाधिकरणपदः कर्मधारयसंज्ञो भवतीत्येवं ब्रुवता वृत्तिकारेण समासस्यैवेयं संज्ञा, न तदर्थानां पदानामिति स्फुटमेवाख्यातं भवति।'[20] इति। अत्र वृत्तिकारो नाम काशिकाकारः। एवं महाभाष्याद् विलक्षणमेव मतं प्रस्तुतम्।

**1.3.4. बालमनोरमातत्त्वबोधिनीकारस्य मतम् –** सिद्धान्तकौमुद्या व्याख्यान-भूतायां बालमनोरमायां तत्त्वबोधिन्यां च अस्य सूत्रस्य वर्णनावसरे समानाधिकरणः इति पदस्य व्युत्पत्तिः प्रदर्शिता। उभयत्र एव समानाधिकरणशब्दस्य अर्शआद्यजन्तत्वं स्वीक्रियते। तथापि तत्र बालमनोरमाकारः वासुदेवदीक्षितः – 'समानम् एकमधिकरणं वाच्यं ययोः पदयोः, ते समानाधिकरणे पदे, ते अस्य स्त इति समानाधिकरणः, मत्वर्थीयः अर्शआद्यच्। समानाधिकरणानेकपदावयवकस्तत्पुरुषः कर्मधारयसंज्ञको भवतीत्यर्थः।'[21] इति। एवमेव तत्त्वबोधिनीकारः ज्ञानेन्द्रसरस्वती स्वीकरोति।[22] तेन तत्पुरुषशब्दः मुख्यः समासपरकः समानाधिकरणशब्दश्च अर्शआद्यजन्तः समानाधिकरण-पदपरकः इति तयोः आशयः इति स्पष्टम्।

## 1.4. समीक्षणम्

**'तत्पुरुष समानाधिकरणः कर्मधारयः'** (1.2.42) इति सूत्रस्य वर्णनावसरे महाभाष्ये समानाधिकरणः इति सूत्रस्थे पदे दोषः प्रदर्शितः। तत्पुरुषस्य एकपदत्वाद् एकार्थकत्वाच्च सामानाधिकरण्यं न सम्भवति। अतः समानाधिकरणः इति तत्पुरुषस्य न विशेषणम्। ततः अस्य दोषस्य निवारणाय समानाधिकरणः इति पदस्य स्थाने समानाधिकरणपदः इति पदस्य सन्निवेशेन न्यासान्तरं कल्पितम्–'तत्पुरुषः समानाधिकरणपदः कर्मधारयः' इति। ततः सूत्रभेददोषं प्रदर्श्य सूत्रपक्षम् आलम्ब्य समानाधिकरणः इति प्रदर्शितस्य दोषस्य समाधानं महाभाष्ये प्रत्यपादि। 'तादर्थ्यात् ताच्छब्द्यम्' इति न्यायम् आलम्ब्य गौणस्य तत्पुरुषसमासघटकपदपरकस्य तत्पुरुषशब्दस्य सूत्रे स्वीकारो विहितः। तेन 'तत्पुरुषसमासघटकानि यानि पदानि तानि समानाधिकरणानि सन्ति कर्मधारयसंज्ञां भजन्ते' इति सूत्रार्थः समायाति। ततः 'समुदाये वाक्यपरिसाप्तिः' इति नियमस्वीकारेण तत्पुरुषसमासस्य एव कर्मधारयसंज्ञा विहिता इत्येवं न्यासान्तरं नापेक्षते इति प्रतिपादितं महाभाष्यकारेण।

वस्तुतस्तु सूत्रेण एव कार्यसिद्धेः न्यासान्तरकल्पनम् अनर्थकम् इति महाभाष्यकारस्य आशयः। यतो हि स एव 'वृद्धिरादैच्' इति सूत्रभाष्ये सूत्राणां सार्थक्यं विवृणोति – 'न यथा लोके, तथा व्याकरणे। प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण।'[23] इति।

सूत्राणि हि दृष्टादृष्टफलजनकानि भवन्ति। 'छन्दोवत्सूत्राणि भवन्ति' इति वृद्धिसूत्रोक्तेः सूत्राणां वेदाध्ययनवद् अदृष्टफलजनकत्वात् न्यासान्तरेण इष्टसिद्धौ अपि सूत्रमेव स्वीकार्यम्। अत एव 'तत्पुरुषः समानाधिकरणपदः कर्मधारय' इति न्यासान्तरं प्रत्याख्याय 'तत्पुरुषः समानाधिकरणः कर्मधारयः' इति सूत्रमेव स्वीकार्यम्।

किञ्च, नागेशभट्टेन स्वधिया यत् सूत्रस्य स्थाने समानाधिकरणस्य तत्पुरुषकर्मधारय-संज्ञाद्वयसाधकं 'समानाधिकरणः कर्मधारयश्च' इति न्यासान्तरं प्रत्यपादि तत् तु बुद्धिवैशद्य-प्रदर्शनम् एव। तस्मिन् न्यासान्तरे सूत्रस्वरूपस्य विनाशात् महाभाष्यस्य च स्वारस्याभावात् तत् हेयमेव।

एवमेव उद्द्योतनकारेण अन्नम्भट्टेन विहितं 'कर्मधारयः' इति न्यासान्तरं तथा न समीचीनम् इति मे भाति। यतो हि तत्र स्थलद्वये सूत्रभेददोषः। एकं स्थलं तावत् **'तत्पुरुषः समानाधिकरणः कर्मधारयः'** (1.2.42) इति सूत्रस्य स्थाने 'कर्मधारयः' इति

न्यासान्तरम्। अन्यच्च 'द्विगुश्च' इति सूत्रस्य स्थाने 'द्विगुकर्मधारयौ च' इति न्यासान्तरम्। अन्यच्च 'द्विगुश्च' इति सूत्रस्य स्थाने 'द्विगुकर्मधारयौ च' इति न्यासान्तरम्। किञ्च सूत्रेषु पौर्वापर्यभङ्गः अपि तेन स्वीकृतः। यथा द्वितीयाध्याये विद्यमानात् 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' (2.1.49) इति सूत्रात् परं प्रथमाध्यायस्थस्य 'तत्पुरुषः समानाधिकरणः कर्मधारयः' (1.2.42) इति सूत्रस्य न्यासान्तरं 'कर्मधारयः' इति कल्पितमिति सूत्रपौर्वापर्यभङ्गदोषः। अतः एतन्मतं बुद्धिप्रदर्शनमेवेति ग्रहीतुम् अशक्यम्।

काशिकाकारेण तत्पुरुषः इति समासस्य संज्ञा इत्युक्त्वा तत्पुरुषः इति समासरूपमुख्यार्थप्रतिपादकः शब्दः सूत्रे स्वीकृतः। परन्तु समानाधिकरणः इति पदस्य गौणार्थः स्वीकृतः–समानाधिकरणानि पदानि यस्य स इत्येवंरूपः। अर्थात् सामानाधिकरण्यं तत्पुरुषघटकपदनिष्ठं तत्पुरुषे उपचर्यते। एतन्मतं महाभाष्ये तत्पुरुषः इति तद्घटकपदपरकस्य शब्दस्य स्वीकाराद् महाभाष्याद् विलक्षणम् अस्ति। किन्तु महाभाष्यस्य यः न्यासान्तरस्य अस्वीकारे सूत्रस्य स्वरूपसंरक्षणे आग्रहः, तमाग्रहं समर्थयति सूत्रकार्यमपि सम्पादयति इति महाभाष्यस्य समीपतरमिदं मतमिति मे मतिः।

बालमनोरमायां तत्त्वबोधिन्यां समानाधिकरणशब्दः अर्थआदित्वाद् अच्प्रत्ययान्त एव स्वीकृतः। समानाधिकरणानि पदानि अस्य सन्ति इति समानाधिकरणशब्दस्यार्थः। तेन अवगम्यते यद् बालमनोरमाकारस्य तत्त्वबोधिनीकारस्य च तत्पुरुषः इति समासविशेषस्य संज्ञा इत्येव अभिप्रायः। एतन्मतं यद्यपि साक्षाद्भाष्यं नानुसरति परन्तु भाष्यतात्पर्यबोधकमेव इति मे धीः।

*

**सन्दर्भाः**


1. वैयाकरणसिद्धान्तकौमुदी, अ.1.2.42
2. व्याकरणमहाभाष्यम्, द्वितीयखण्डः
3. आक्षेपवार्तिकभाष्यम्, तत्रैव
4. महाभाष्यप्रदीपव्याख्यानानि, तत्रैव
5. व्याकरणमहाभाष्याम्, द्वितीयखण्डः
6. तत्रैव, उद्द्योतः

7. तत्रैव, उद्द्योतः
8. तत्रैव, उद्द्योतः
9. तत्रैव, न्यासान्तरसमाधानवार्तिकम्, तत्रैव
10. तत्रैव,सिद्धान्तिसमाधानभाष्यम्, तत्रैव
11. तत्रैव, उद्द्योतः
12. तत्रैव, उद्द्योतः
13. तत्रैव, उद्द्योतः
14. तत्रैव, उद्द्योतः
15. तत्रैव, उद्द्योतः
16. महाभाष्यप्रदीपव्याख्या, द्वितीयखण्डः
17. न्यासपदमञ्जरीसहिता काशिकावृत्तिः, प्रथमखण्डः
18. तत्रैव, न्यासः
19. तत्रैव, न्यासः
20. तत्रैव, न्यासः
21. वैयाकरणसिद्धान्तकौमुदी, बालमनोरमा, अ.1.2.42
22. समानाधिकरणशब्दः अर्शआद्यजन्तः समानाधिकरणपदक इत्यर्थः। तत्रैव, तत्त्वबोधिनी
23. व्याकरणमहाभाष्यम्, द्वितीयखण्डः

*

## किञ्चिद् रामायणीयम्

*** रावणस्य आत्मश्लाघा ( सीतां प्रति )**

- अहं वैश्रवणस्य सापत्नः भ्राता रावणः
- दशग्रीवः
- प्रतापवान्
- यस्य सगन्धर्वाः देवाः पिशाचपतगोरगाः विद्रवन्ति
- यस्य प्रजाः सदा मृत्योः इव भीताः
- येन वैश्रवणः वैमात्रः भ्राता निर्जितः
- (वैश्रवणस्य) पुष्पकं नाम कामगं शुभं विमानं वीर्याद् आवर्जितम्
- संजातरोषस्य (मम) मुखं दृष्ट्वा एव
  शक्रपुरोगमाः सुराः परित्रस्ताः विद्रवन्ति
- मारुतः शङ्कितः वाति (यत्र अहं तिष्ठामि)
- तीव्रांशुः शिशिरांशुश्च रविः भयात् सम्पद्यते (यत्र अहं तिष्ठामि)
- निष्कम्पपत्राः तरवः स्तिमितोदकाः नद्यः तत्र भवन्ति (यत्र अहं तिष्ठामि)

**आधारः - रामायणम्, अरण्यकाण्डम्, 48 सर्गः**

*** प्लवगर्षभः हनूमान् लङ्कां जगाम। सः कीदृशः?**

- महामतिः
- वीतमोह इवात्मवान्
- त्रीन् क्रमान् विक्रम्य बलवीर्यहरो हरिः इव
- चारुनानाविधरूपधारी
- परैः अशक्यं प्रतिपन्नरूपः
- समीक्षितात्मा
- समवेक्षितार्थः
- महात्मा

**आधारः - रामायणम्, सुन्दरकाण्डम्, 1 सर्गः**

- महाबलः
- स्वस्थः
- वीर्यवान्
- वीर्यवतां श्रेष्ठः
- प्लवतामपि उत्तमः
- तेजस्वी

**आधारः - रामायणम्, सुन्दरकाण्डम्, 2 सर्गः**

# तत्त्वचिन्तामणौ हेत्वाभासनिरूपणे सङ्गतिप्रदर्शनम्

**डा. अञ्जनदासः**

प्रत्येकं शास्त्रे सङ्गतिनिरूपणमतीव प्रयोजनीयो विषयः। कारणं हि निरूपणमात्रेष्वेव पूर्वग्रन्थेन सह तथा अव्यवहितपूर्वग्रन्थेन सह, ग्रन्थस्यास्य सङ्गतिरस्ति न वेति जिज्ञासा स्वत एवोदेति। किञ्च शास्त्रेऽपि एवमनुरूपमुक्तम्।

(1) ''शास्त्रे नासङ्गतं प्रयुञ्जीत।''[1]

(2) ''असङ्गतं प्रयुञ्जानः प्रयोक्ता अवधीरितवचन उन्मत्तवदुपहस्यते'' चेति। तथा च सङ्गतिशब्दस्यार्थो हि पूर्वग्रन्थेन सह परग्रन्थस्य आकांक्षणीयसम्बन्धः। तद्धि न्यायभाषायां भाषितम् – ''**अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञान-विषयीभूतोऽर्थः**''[2] इति। इयं सङ्गतिश्च षड्विधा–

**सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।**
**निर्वाहैककार्यत्वे षोढा सङ्गतिरिष्यते।।**[3] इति।

अर्थात् षोढा सङ्गतिर्हि–प्रसङ्गसङ्गतिः, उपोद्घातसङ्गतिः, हेतुतासङ्गतिः, अवसरसङ्गतिः, निर्वाहकत्वसङ्गतिः, एककार्यत्वसङ्गतिश्चेति।

तथा च नव्यनैयायिकस्य गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणेः सामान्यनिरुक्तिप्रकरणे अनन्तराभिधानं हेत्वाभासविषयकज्ञानानुकूलव्यापारात्मकहेत्वाभासनिरूपणमेव, तत्प्रयोजिका जिज्ञासा च 'के हेत्वाभासा' इति हेत्वाभासत्वावान्तरधर्मप्रकारकज्ञानं जायतामित्यर्थिका, तज्जनकज्ञानञ्च हेत्वाभासतत्त्वज्ञानं तद्धर्मावान्तरधर्मप्रकारकज्ञानगोचरेच्छां प्रति तद्धर्मज्ञानस्य कारणत्वस्याङ्गीकारात्। एतदस्वीकर्तृमते तु इष्टसाधनताज्ञानञ्च हेत्वाभासत्वज्ञानं मे इष्टसाधनमित्याकारकम्। तथा च इष्टसाधनताज्ञानविशेष्यीभूतज्ञानांशे प्रकारतया भासमानस्य हेत्वाभासत्वस्य तादृशजिज्ञासाकारणीभूतेष्टसाधनताज्ञानविषयत्वमप्यक्षतम्, तदेव च हेत्वाभासत्वं सङ्गतिः।

''**अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते**''[4] इत्यत्र अथशब्दोऽन्यार्थमुपनीयमानोदकुम्भदर्शनवदानन्तर्यवाचकोऽपि स्वप्रयोगमात्रेण मङ्गलार्थमपि सूचयति। यतः शङ्खध्वनेरिव अथशब्दोच्चारणस्यापि माङ्गलिकत्वान्निम्नोक्तवचनस्मरणात्–

**ॐकारश्चाथशब्दश्च द्वावैतौ ब्रह्मणः पुरा।**
**कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ।।**[5] इति।

न च ग्रन्थादावेव सम्भावितविघ्नविनाशाय मङ्गलाचरणसमुदाचार इति वाच्यम्, ''मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते'' इत्यादिश्रुतेर्ग्रन्थमध्यभागेऽपि तदाचरणदर्शनाद्विशेषतोऽतिगहनस्य हेत्वाभासनिरूपणस्य कृच्छसाध्यतया तन्निरूपणप्रारम्भे सम्भावितविघ्नाशङ्कया तदाचरणस्य न्याय्यत्वाच्च। 'अथ'शब्दस्यानन्तर्यार्थः। तच्च ध्वंसाधिकरणकालवृत्तित्वरूपम्। वस्तुतस्तु सद्धेतुनिरूपणानन्तरं वेत्यानन्तर्यार्थः। 'अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते' इति मूलमेव प्रतिज्ञा। सा च स्वाव्यवहितोत्तरकालकर्तव्यप्रकारकबोधानुकूलव्यापारः। तत्र 'निरूप्यन्ते' इत्यत्र वर्तमानसामीप्यार्थकलट्प्रत्ययस्य वर्तमानकालाव्यवहितोत्तरकालीनत्वमर्थः, तस्य च निरूपणपदार्थेऽन्वयः। 'तत्त्वनिर्णयविजयप्रयोजकत्वाद्' इत्यत्र तज्ज्ञानजन्यजिज्ञासाधीनत्वं पञ्चम्यर्थः। 'निरूप्यन्ते' इत्यत्र कर्मवाच्यविहितलट्प्रत्ययस्य विषयत्वरूपं कर्मत्वमर्थः। शिष्यसमवेतज्ञानानुकूलव्यापारो निपूर्वरूपधात्वर्थः। व्यापारस्य निर्विषयकत्वेऽपि शिष्यसमवेतज्ञानविषयतापन्नेषु हेत्वाभासेषु याचितमण्डनन्यायेन निरूपणघटकशिष्यसमवेतज्ञानीयविषयतामादाय तत्र तदनुकूलव्यापारस्यापि निरूपितत्वसम्बन्धेनान्वयो बोध्यः। मयेति कर्तृपदमूह्यमत्र, तत्र तृतीयार्थः कृतिः। तथा च मत्समवेतवर्तमानकालोत्तरकालवृत्तिकृतिप्रयोज्यसद्धेतुनिरूपणानन्तरकालीनतत्त्वनिर्णयविजयप्रयोजकत्वज्ञानजन्यजिज्ञासाधीनशिष्यसमवेतबोधानुकूलव्यापारविषयतावन्तो हेत्वाभासा इति समुदितशाब्दबोधः। 'अथ' शब्दार्थविषये कलाविलासे विलसति एवं तत्त्वम्–

''आनन्तर्यमथशब्दार्थः। आनन्तर्यञ्च ध्वंसकालीनत्वमवयवग्रन्थध्वंसकालीनत्वमिति यावत्। अन्वयश्चास्य 'निरूप्यन्ते' इत्यत्र निपूर्वकरूपधात्वर्थे ज्ञानानुकूलव्यापारे। मयेत्यध्याहार्यम्। अध्याहृततृतीयार्थः कृतिजन्यत्वम्। तदेकदेशीभूतायां कृतौ समवायावच्छिन्नाधेयतासम्बन्धेन मदर्थस्यान्वयः। कृतिजन्यत्वस्यापि तादृशधात्वर्थे ज्ञानानुकूलव्यापारेऽन्वयः। तत्त्वनिर्णयविजयप्रयोजकादित्यत्र पञ्चम्यर्थो ज्ञानजन्यजिज्ञासाधीनत्वम्, तत्र ज्ञाने प्रकृत्यर्थस्य तादृशप्रयोजकत्वस्य स्वप्रकारकत्वसम्बन्धेनान्वयः। निरुक्तपञ्चम्यर्थस्यापि निपूर्वकरूपधात्वर्थे ज्ञानानुकूलव्यापारेऽन्वयः कर्मविहिताख्यातार्थः विषयत्वं, तस्य च प्रथमान्तपदोपस्थाप्यहेतुवदाभासन्त इति व्युत्पत्त्या हेत्वाभासशब्दप्रतिपाद्ये दुष्टहेतुस्वरूपे स्वरूपसम्बन्धेनान्वयः। तथा च अवयवग्रन्थध्वंसकालीनो यो मत्समवेतकृतिजन्यः तत्त्वनिर्णयविजयप्रयोजकत्वप्रकारकज्ञानजन्यजिज्ञासाधीनः ज्ञानानुकूलव्यापारस्तद्विषयतावन्तो दुष्टहेतव इत्यन्वयबोधः पर्यवसितः।

यद्यपि ज्ञानेच्छादेरेव सविषयकतया ज्ञानानुकूलव्यापारस्य शब्दात्मकत्वाद् विषयत्वा-

प्रसिद्धा कर्मविहिताख्यातार्थस्य विषयतात्मकत्वाभिधानमयुक्तमित्युच्यते, तथापि याचितमण्डनन्यायेन ज्ञानविषयत्वमादायैव व्यापारस्य सविषयकत्वमिति प्राचीनसिद्धान्तमभिप्रेत्यैव व्यापारविषयताया हेत्वाभासशब्दार्थेऽन्वयः''[6] इति।

शिष्यो हि द्विविधः तत्त्वबुभुत्सुर्विजिगीषुश्च। तयोरुभयोरेव प्रयोजनं प्रदर्शयन्नाह– ''**तत्त्वनिर्णयविजयप्रयोजकत्वात्**''[7] इति। एतेन शास्त्रस्य सम्बन्धप्रयोजनमपि प्रदर्शितम्। न ह्यविदितसम्बन्धप्रयोजनः कोऽपि शास्त्रे प्रवर्तते। तदुक्तं कुमारिलभट्टैः–

**ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।**
**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥**[8] इति।

तत्त्वनिर्णयविजयप्रयोजकत्वादित्यत्र स्वमतव्यवस्थापनरूपे स्वार्थे तत्त्वबुभुत्सुकथारूपे च वादे तत्त्वनिर्णयः। अवास्तवकोटिनिश्चायकहेतौ दुष्टत्वज्ञाने वास्तवकोटिनिश्चयो भवतीति हेत्वाभासस्यापि तत्त्वनिर्णयप्रयोजकत्वमिति। जल्पश्च वास्तवकोटिकनिश्चयपूर्वकपरमतनिराकरणम्, परमतनिराकरणमात्रञ्च वितण्डेति। तथा चोक्तम्–

**स्वपक्षस्थापनहीना विजिगीषोः कथा तु या।**
**सा वितण्डा समाख्याता वादनिग्रहकारिणी॥**[9] इति।

तदेतयोरुद्भावनद्वारा परोक्तहेतौ दुष्टत्वोद्भावने परस्य निग्रहाद्दोषस्य विजयप्रयोजकत्वमिति। केषाञ्चित् 'के हेत्वाभासाः' इति जिज्ञासया, केषाञ्चिच्च 'के तत्त्वनिर्णयप्रयोजका' इति जिज्ञासया हेत्वाभासनिरूपणहेत्वाभासत्वरूपप्रसङ्गस्य तत्त्वनिर्णयरूपैककार्यकारित्वरूपैककार्यानुकूलत्वस्य चानन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वादत्र मूले एव सङ्गतिः प्रदर्शिता इति। अपि च बलदेवाचार्यैर्भणितम्– ''हेत्वाभासनिरूपणे इत्यत्र प्रयोजकत्वं सप्तम्यर्थः तस्य स्वरूपेण सङ्गतित्वैकदेशे जिज्ञासायामन्वयः। तथा च हेत्वाभासनिरूपणप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपसङ्गतित्वं प्रसङ्गनिरूपिताधेयतावदित्यर्थः। आधेयत्वं सम्भवपदार्थः निरूपितत्वं षष्ठ्यर्थः हेत्वाभासपदार्थत्वं प्रसङ्गपदार्थः। तथा च तादृशसङ्गतित्वं प्रसङ्गनिरूपिताधेयतावत् दुष्टहेतोरस्मरणात् स्मरणञ्च प्रकारतासम्बन्धेन हेतुः। अथवा अनन्तराभिधानप्रयोजकजिज्ञासाजनकस्मरणप्रयोजकनिरूप्यनिष्ठसङ्गतिः, तथा च प्रकृतेर्व्याप्तिपक्षधर्मत्वाभाव एव सङ्गतिः, स एव प्रसङ्गपदार्थः। प्रसङ्गत्वञ्चोपोद्घातादिपञ्चकभिन्नत्वे सति अनन्तराभिधानप्रयोजनजिज्ञासाजनकस्मरणप्रयोजकसम्बन्धत्वमिति, तादृशसङ्गत्या हेत्वाभासनिरूपणं सुसङ्गमिति भावः। ननु सप्तम्यन्तार्थहेत्वाभासनिरूपणप्रयोजनकत्वस्य सङ्गतित्वैकदेशेऽनन्तराभिधानप्रयोजकजिज्ञासायामन्वये अनन्तराभिधानप्रयोजक इत्यनेन

हेत्वाभासनिरूपणप्रयोजकत्वस्य द्विधा भानप्रसङ्ग इति चेन्न, विशिष्टवाचकपदानां सति पृथग्विशेषणवाचकपदाभिधाने विशेष्यमात्रपरत्वनियमेन दोषाभावात्।"[10] इति।

नव्यन्यायशिरोभूषणेन दीधितिकारेण सङ्गतिप्रदर्शने स्वाभिमतं व्यक्तम् – "**एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात् तत्त्वनिर्णयादिरूपतत्कार्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते 'अथे'ति"।**[11]

'एतावता प्रबन्धेन' इत्यत्र एतावत्पदोत्तरं तृतीयार्थः प्रबन्धपदार्थावयवग्रन्थान्वयोऽभेदः, प्रबन्धपदोत्तरं तृतीयार्थोऽप्यभेदः, तस्य निरूप्य इत्यत्र निपूर्वकरूपधात्वर्थीभूते ज्ञानानुकूल-व्यापारेऽन्वयः।

ननु प्रबन्धस्याभेदेन निरूपणक्रियायामन्वये कथं न द्वितीया? क्रियाविशेषणानां कर्मत्वमित्यनुशासनादिति चेन्न, अजहल्लिङ्गस्य क्रियाविशेषणत्वे तद्वाचकपदात् तृतीयैव, जहल्लिङ्गस्य क्रियाविशेषणत्वे तद्वाचकपदाद् द्वितीया तत्रैवोक्तानुशासनप्रवृत्तेः, अन्यथा अनुमितिं जानातीति प्रयोगापत्तेः। वस्तुतो यत्राभेदसम्बन्धेन धात्वर्थेऽन्वयः तत्रैव द्वितीया यत्राभेदस्यापि धात्वर्थे प्रकारतया भानं तत्र तृतीयापीति कलापे उक्तम्। अयन्तु विशेषः। क्रियाविशेषणस्य द्वितीयान्तस्य तृतीयान्तस्य वा सर्वत्राभेदो विभक्तेरर्थः। द्वितीयार्थभेदस्य संसर्गविधया तृतीयार्थस्य च प्रकारविधया भानमिति।

सपरिकरं हेतुं नाम व्याप्तिपक्षधर्मताविशिष्टम्, सद्धेतुमिति यावत्। द्वितीयार्थोऽभेदः, तस्य हेतावन्वयः। हेतुमित्यत्र द्वितीयार्थो विषयित्वम्, तस्य निरूप्येत्यत्रत्यधात्वर्थनिरूपण-घटकज्ञानेऽन्वयः। निरूपणञ्च शिष्यसमवेतज्ञानानुकूलो व्यापारः, आनन्तर्यं ल्यबर्थः, तच्च ध्वंसाधिकरणकालवृत्तित्वम्, तस्याग्रिमनिरूपणेऽन्वयः। तत्प्रसङ्गादिति तस्य प्रसङ्गः, तस्मादिति। तत्पदं सपरिकरहेतुपरम्, निरूपितत्वं षष्ठ्यर्थः सम्बन्धो वा, प्रसङ्गो नाम सङ्गतिः। पञ्चम्यर्थो हि ज्ञानजन्यजिज्ञासाधीनत्वम्। तस्य निरूपणेऽन्वयः। तत्कार्येत्यत्रापि तत्पदं पूर्ववत्। सपरिकरहेतुप्रयोज्यकार्येत्यर्थः। एककार्यकारित्वं नाम सङ्गतिः। प्रकृते एककार्यं हि तत्त्वनिर्णयो विजयश्च, तत्प्रयोजकत्वं सद्धेतौ हेत्वाभासे चेत्यर्थः। पञ्चम्यर्थः ज्ञानजन्यजिज्ञासाधीनत्वम्। तदाभासेत्यत्र तत्पदं हेतुमात्रपरम्, हेत्वाभासेत्यर्थः। अतः तदाभासनिरूपणशब्दोत्तरं द्वितीयार्थो विषयत्वं विषयित्वं वा तस्य चाव्यवहितोत्तरकाल-कर्तव्यत्वप्रकारकशिष्यसमवेतबोधानुकूलव्यापारात्मकप्रतिपूर्वकज्ञाधात्वर्थप्रतिज्ञैकदेशे बोधेऽन्वयः। निरुक्तप्रतिज्ञायाश्च आख्यातार्थकृतावनुकूलत्वसम्बन्धेन अन्वयः।

तथा च एतावदभिन्नप्रबन्धाभिन्नं यत्सपरिकरहेतुविषयकज्ञानानुकूलव्यापारात्मकं निरूपणं तद्ध्वंसकालीनो यः सद्धेतुनिरूपितप्रसङ्गसङ्गतिज्ञानजन्यजिज्ञासाधीनस्तत्त्वनिर्णयविजयरूप-

तत्कार्यकारित्वसङ्गतिज्ञानजन्यजिज्ञासाधीनो दुष्टहेतुविषयकज्ञानानुकूलव्यापारः तद्विषयकाव्य-व्यवहितोत्तरकालकर्तव्यत्वप्रकारकशिष्यसमवेतबोधानुकूलव्यापारानुकूलकृतिमान् मूलकारस्तथा मणिकार इत्यन्वयबोध इति शम्।

*

**सन्दर्भाः—**


1. व्याप्तिपञ्चकम् (सं.राजेन्द्रनाथ घोष), पृ.30
2. तदेव, पृ.30
3. तदेव, पृ.30
4. सामान्यनिरुक्तिप्रकरणम्, पृ.1
5. मीमांसादर्शनम्, पृ.5
6. सा.नि.प्र., पृ.1-2
7. सा.नि.प्र., पृ.1
8. श्लोकवार्तिकम्, श्लो.11, सूत्रम् 1
9. सा.नि.जा., पृ.23
10. सामान्यनिरुक्तिः, पृ.5
11. सा.नि.प्र., पृ.2


*

## किञ्चिद् रामायणीयम्

*** प्राप्तभूयिष्ठपारः कपिः सर्वतः परिलोकयन् लङ्कायां किं ददर्श?**

- वनराजिम्
- विविधद्रुमभूषितं द्वीपम्
- मलयोपवनानि
- सागरम्
- सागरानूपान्
- सागरानूपजान् द्रुमान्
- सागरस्य पत्नीनां मुखानि
- सरलान् कर्णिकारान्
- सुपुष्पितान् खर्जूरान्
- प्रियालान् मुचुलिन्दान्
- कुटजान् केतकान्
- गन्धपूर्णान् प्रियङ्गून्
- नीपान्
- सप्तच्छदान्
- असनान्
- कोविदारान्
- पुष्पितान् करवीरान्
- पुष्पभारनिबद्धान् मुकुलितान् विहगाकीर्णान्
- पवनाधूतमस्तकान् पादपान्
- हंसकारण्डवाकीर्णाः पद्मोत्पलावृताः वापीः
- आक्रीडान् विविधान् रम्यान् विविधैः वृक्षैः सर्वर्तुफलपुष्पितैः संततान् जलाशयान्
- रम्याणि उद्यानानि।

**आधारः - रामायणम्, सुन्दरकाण्डम्, 2 सर्गः**

*** प्रदोषकाले हनुमान् लङ्कापुरीं प्रविवेश। तदा सा 'लङ्का' कीदृशी?**

- प्रविभक्तमहापथा रम्या
- काञ्चनराजतैः स्तम्भैः प्रासादमालावितता
- शातकुम्भनिभैः जालैः गन्धर्वनगरोपमा
- कार्तस्वरविभूषितैः स्फटिकसंकीर्णैः सप्तभौमाष्टभौमैः तलैः (युता)
- मुक्ताजालविराजितैः वैडूर्यमणिचित्रैः च तलैः शोभितभवनयुता
- समलङ्कृता
- अचिन्त्या
- अद्भुताकारा
- पाण्डुराविद्धविमानमालिनी
- महार्हजाम्बूनदजालतोरणा
- यशस्विनी
- रावणबाहुपालिता
- क्षपाचरैः भीमबलैः समावृता
- तारागणैः मध्यगतः विराजन् चन्द्रः अनेकरश्मिभिः ज्योत्स्ना वितानेन लोकान् वितत्य अस्य (रावणस्य) साचिव्यम् उत्तिष्ठते इव।

**आधारः - रामायणम्, सुन्दरकाण्डम्, 2 सर्गः**

# अनन्यो वितण्डाग्रन्थः तत्त्वोपप्लवसिंहः

**डॉ. पूनम शर्मा**

गौतमीयन्यायशास्त्रे शास्त्रार्थस्त्रेधा भवतीति प्रतिपादितः। शास्त्रार्थस्य तत्र निर्देशः कथाशब्देन क्रियते न्यायभाष्यकृता वात्स्यायनेन यस्याश्च त्रिविधत्वं निरूपितम् – वादः, जल्पः, वितण्डा चेति। एते त्रयोऽपि भेदाः परस्परं भिद्यमाना अपि भारतीयदर्शन-साहित्यस्य विकासे प्रभूतं योगदानमापादयन्ति, विविधेषु दर्शनग्रन्थेषु मध्यकालिकेषु, प्रयुक्ता दृश्यन्ते स्वपक्षस्थापने प्रतिपक्षनिरसने च। तेषु वादरूपः शास्त्रार्थः सर्वथा ग्रहणीयतामर्हति यत्र **'प्रमाण-तर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्ष–प्रतिपक्षग्रहो'**[1] भवति। अस्य शास्त्रार्थप्रकारस्य ग्रहणीयत्वे महान् हेतुर्वर्तते प्रमाणतर्कयोः साधनयोः प्रयोग इति। न कस्यापि प्रतिवादिनोऽस्मिन् विषये आपत्तिर्जायते। अथ यथाकथमपि विजयं कामयमाना जल्पप्रकारं शास्त्रार्थे समानयन्ति, यत्र प्रमाणं तर्कं वा हेतुत्वेन सम्प्रयुज्यापि छल–जाति–निग्रहस्थानरूपाणि साधनानि[2] समानीय प्रतिवादिनः पराजेतुं तत्पक्षनिरसनं च कामयन्ते वादिनः। इह स्वपक्षस्थापनं प्रति भवत्यभिनिवेश इति नासौ शास्त्रार्थप्रकारः सर्वथा गर्हणीयः। ते तु वितण्डानामकं शास्त्रार्थप्रकारम् आश्रयन्ते तेषां खण्डनमात्रं लक्ष्यं भवति, तेषां स्वकीयः पक्षः कः इत्यपि न स्थापयन्ति। अत एवोक्तं गौतमेन–**स्वप्रतिपक्षस्थापनाहीनो वितण्डा।**[3] भारतीय-दर्शनसाहित्ये वितण्डामात्रस्य शास्त्रार्थप्रकारस्य प्रयोगार्थं सर्वेषामवधानमर्हति जयराशिभट्टकृतः 'तत्त्वोपप्लवसिंहो' नामानन्यो ग्रन्थः।

ग्रन्थस्यास्य एकलो हस्तलेखः (6 दिसम्बर 1298 ई. दिनाङ्के, तालपत्रेषु अङ्कितः)[4] पाटण (गुजरात)–स्थित–जैनभण्डारसंस्थातो लब्धः, स एव पण्डित सुखलाल जी संघवी–रसिकलाल पारीख महोदयाभ्यां सम्पाद्य 1940तमे ईस्वीयवर्षे गायकवाडग्रन्थमालायां बडौदातः प्रकाशितो बभूव। तदनु वाराणस्यां बौद्धभारती-ग्रन्थमालायामपि स्वामिद्वारकादासशास्त्रिसम्पादकत्वे 1987 ई. वर्षे प्राकाश्यं नीतः। ग्रन्थस्यास्य तार्किकं महत्त्वमाकलय्य 2010 ई. वर्षे आंग्लभाषानुवादेन टिप्पणीभिश्च समलंकृत्य ईस्थर सोलोमन – सुचेतामेहताभ्यां सम्पादितं संस्करणमपि परिमल प्रकाशनेन दिल्लीतः प्रकाशितमस्ति। किञ्च 2012 ई. वर्षे डॉ. व्ही. एन. झाकृतः

आंग्लभाषानुवादोऽपि अर्णाकुलम् (केरल)स्थ-चिन्मय इंटरनेशनल शोध–प्रकाशनपक्षतः प्रकाशितो वर्तते।

विलक्षणोऽयं ग्रन्थः कतिपयविश्वविद्यालयानां दर्शनशास्त्रपाठ्यक्रमे निर्धारितो वर्तते साकल्येनांशतो वा। तदिहास्य परिचयो निबन्धेऽस्मिन् समासेन समीक्षादृशा प्रस्तूयते।

तत्त्वोपप्लवसिंहो नाम ग्रन्थः चार्वाकमतस्यानुयायिना जयराशिभट्टेन रचित इति प्रायोवादः, बौद्धभारती–संस्करणे उपशीर्षकत्वेन ''चार्वाकाणां ग्रन्थविशेषः'' इति निर्दिष्टत्वात्। किञ्च ग्रन्थस्योपान्त्यपद्ये ग्रन्थकारस्य ग्रन्थस्य ग्रन्थोद्देश्यस्य च निर्देशः सम्यक् लभ्यते। तथा च –

**ये याता न हि गोचरं सुरगुरोर्बुद्धेर्विकल्पा दृढाः**
**प्राप्यन्ते ननु तेऽपि यत्र विमले पाखण्डदर्पच्छिदि।**
**भट्टश्रीजयराशिदेवगुरुभिः सृष्टो महार्थोदयः**
**तत्त्वोपप्लवसिंह एष इति यः ख्यातिं परां यास्यति॥**

अत्र सुरगुरुः बृहस्पतिः सर्वस्त्रोतोग्रन्थेषु चार्वाकमतप्रवर्तकः इति स्मर्यते। तस्य बुद्धिविकल्पनिरसनीयेषु विषयेषु लेखकेनास्मिन् ग्रन्थे स्थाने-स्थाने प्रकल्पिताः। लेखको जयराशिभट्टः आत्मानमपि सुरगुरुं कल्पयन् महार्थोदयरूपं ग्रन्थं रचयित्वा चार्वाकमतं सर्वसिद्धान्तनिरसनपरं पुनः प्रतिष्ठापयितुं वाञ्छति। तदिदं ग्रन्थरचनाया महदुद्देश्यम्।

एतेन श्लोकेन सिध्यति यज्जयराशिभट्टो बृहस्पतिप्रवर्तितस्य चार्वाकदर्शनस्यानुगामी सन्नपि प्रवर्तकापेक्षया बुद्धिमत्तरमात्मानं मन्यते यतो बृहस्पतिबुद्धौ ये प्रबला विकल्पा न गोचरीभूतास्तेऽपि जयराशिना ग्रन्थेऽस्मिन् दर्शिताः। ग्रन्थानुशीलनेनापि ज्ञायते यत्प्रतिपक्ष-सिद्धान्तखण्डनार्थं तर्कदृशा यद् विकल्पजालमुत्तरोत्तरं प्रस्तुतं तेन प्रतिपक्षिसमक्षं न किमप्युत्तरं दृग्गोचरं भवति। एतादृशः खण्डनप्रकारो यद्यपि मध्यकालिकेषु दर्शनग्रन्थेषु प्रयुक्तः किन्तु सर्वेषु तेषु तत्त्वोपल्लवसिंहरीतिः शिखरायते।

ग्रन्थस्यास्य शीर्षकं सार्थकमस्ति। स्वयं ग्रन्थकारः नष्टप्राये ग्रन्थारम्भपद्ये चतुर्थचरणे निरूपयति – **तत्त्वोपप्लवसिंह एव विषयो नूनं मया सृज्यते।**

नष्टाक्षरेषु सम्भवतः लेखकस्य तात्पर्यं प्रतीयते यत् प्रतिपक्षदर्शनसिद्धान्ता हरिणा इव सन्ति येषां संहाराय ग्रन्थोऽयं सिंहोऽस्ति। स्वविरोधिनां विनाशाय सिंहस्य निर्दयता एव विषयपदेन सूच्यते इति कथयन्ति तज्ज्ञाः।[5] मन्यते च जयराशिभट्टो यत् शास्त्रेषु यत् तत्त्वं निरूपितं भवति तत्सर्वं सुन्दरतया आकर्षकं च भाति, पण्डितैरपि स्वव्यवहारेषु,

यथायथं गृह्यते, तस्य याथार्थ्यं च न सम्यक् विचार्यते। तथाहि ग्रन्थान्ते– **'तदेवमुपप्लुतेष्वेव तत्त्वेषु अतिचारितरमणीयाः सर्वे व्यवहारा घटन्त एव।'**[6] तदुपरि चानेन श्लोकेन ग्रन्थोपसंहारः कृतः –

**पाखण्डखण्डनाभिज्ञा ज्ञानोदधि-विवर्धिताः।**
**जयराशेर्जगन्तीह विकल्पा वादिजिष्णवः॥**

'विकल्पाः' इति पदेन ग्रन्थकारः खण्डनसाधनं निर्दिशति – तद्धि प्रतिपक्षिसिद्धान्त-विषये नैकान् विकल्पान् प्रस्तुत्य, तेष्वपि नाना उपविकल्पान् प्रदर्श्य, एकैकस्य निरसनेन मूलसिद्धान्तः साकल्येन उत्सादितो जायते। अत एव ग्रन्थेऽस्मिन् प्रतिपक्षिणां पराजये साधनभूता 'विकल्पा' एव। ते एव 'वादिजिष्णवः' सन्ति। प्रतिवादिमुखमर्दनरूपं लक्ष्यं तु नूनं जयराशिभट्टेन प्राप्यते। वितण्डायास्तदेव स्वरूपम्।

जयराशिभट्टस्य कालः इतिहासतत्त्वज्ञैः 725 ई. वर्षात् पूर्वं मन्यते।[7] कुमारिलस्य तथा च धर्मकीर्तेः ग्रन्थानामुद्धरणं तत्त्वोपप्लवे लभ्यते। किन्तु जैनाचार्य–हरिभद्रसूरेः शंकराचार्यस्य वा परिचयं न ददाति लेखकोऽयम्। वेदान्तविषये प्राचीनमौपनिषदं सिद्धान्तमेव विषयीकरोत्यसौ। जैनाचार्यो विद्यानन्दः (810-875ई.) एवेदम्प्रथमतया 'तत्त्वोपप्लवसिंह'स्य नाम गृह्णाति, तद्वाक्यान्युद्धृत्य च निरस्यति। स्वकालं यावद् विकसितानां दर्शनसिद्धान्तानां निरसने जयराशिभट्टः कृतभूरिपरिश्रमो दृश्यते।

सर्वप्रस्थानविरोधकारणादयं ग्रन्थः सर्वत्र निन्दाविषय एव बभूव। तथापि तर्कप्रवणत्वात् सर्ववादिनां वादेष्वनेकान्तदर्शनाच्च जैनपुस्तकभाण्डागारे एवास्य पाण्डुलिपिः सुरक्षिता प्राप्यते। आधुनिके युगेऽस्य चतुःकृत्वः प्रकाशनं त्वस्य महत्त्वं सूचयति। नाना निबन्धाश्च विविधभाषासु ग्रन्थस्यांशानुपरि प्रकाशिताः सुतरामस्य मूल्यं वर्धयन्ति।

### दर्शनसाहित्यशैली

समासेन संस्कृतभाषायां दार्शनिका शास्त्रीयविवेचने यां शैलीमाश्रयन्ते तस्याः स्वरूपं पञ्चधा दृश्यते। सामान्यतः प्राचीनकाले विषयप्रतिपादनमात्रेण दर्शनशास्त्रमुपक्रान्तम्। सर्वेऽपि प्राथमिका ग्रन्थास्तादृशीं शैलीमेवाभिनिविशन्ते, यथा–

सांख्यकारिका,[8] माण्डूक्यकारिका, तत्त्वार्थाधिगमसूत्रम्, प्रशस्तपादभाष्यम्, न्यायप्रवेशः, न्यायबिन्दुः इत्याद्याः। कुत्रचित्तु सम्प्रदायसिद्धान्तस्य प्रतिपादनाधिक्यं सम्प्रदायान्तरखण्डनस्य अल्पत्वम्। तादृशा ग्रन्थाः वात्स्यायनभाष्यम् (न्यायः), शाबरभाष्यम् (मीमांसा) इत्यादयः। क्वचिद् ग्रन्थेषु स्वपक्षप्रतिपादनस्य अल्पता,

परमतखण्डनस्य प्रधानता दृश्यते। यथा– माध्यमिककारिका (बौद्धदर्शनम्), खण्डनखण्डखाद्यम् (अद्वैतवेदान्तदर्शनम्)। एतादृशा अपि ग्रन्थाः सन्ति तेषु स्वमतस्थापनं परमतखण्डनं च समप्रमाणं प्राप्यते। यथा – मीमांसाश्लोकवार्तिकम्, ब्रह्मसूत्रशाङ्करभाष्यम्, प्रमाणवार्तिकम् (बौद्धदर्शनम्) चेति।

एतासु शैलीषु सतीष्वपि, पञ्चमी शैली वितण्डाया वर्तते यत्र स्वमतस्थापनस्य लेशोऽपि नास्ति, केवलं प्रतिपक्षखण्डनमेव लक्ष्यं जायते। इयं शैली न भूयस्त्वेनोपलभ्यते किन्तु सर्वथा सत्ताशून्यापि नास्ति। तादृश एव ग्रन्थो वर्तते जयराशिभट्टकृतः ''तत्त्वोपप्लवसिंहः' इति। इह तत्त्वसिद्धये प्रयुज्यमानानां सर्वप्रस्थानाभिमतानां प्रमाणानां खण्डनमेकैकशः तर्कबलेन, विकल्पजालसमुत्थापनेन, तेषां च पुनर्निरसनेन कृतमिति पद्धतिः समाश्रिता वर्तते। न कश्चन पक्षः स्वकीयः परकीयो वा समाधातुमिष्ट इति विशेषः।

एतस्य ग्रन्थस्य चार्वाकदर्शनपरत्वं प्रति प्रतिपक्षखण्डनमात्रमिति विशिष्टं कारणम्। ग्रन्थादौ च चार्वाकाभिमतानां तत्त्वानां चतुर्णां समुल्लेखः।[९] किन्तु तेषामपि निरसने-ऽभिनिवेशो जयराशिभट्टस्य – ''तान्यपि विचार्यमाणानि न व्यवतिष्ठन्ते किं पुनरन्यानि?'' अत्र न्यायशास्त्रे प्रसिद्धमाभाणकं प्रमाणं मत्वैव प्रवर्तते ग्रन्थकारः। तथा च–

**मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणात्।**

अतश्च जयराशिर्निवेदयति – ''सल्लक्षणनिबन्धनं मानव्यवस्थानम्, माननिबन्धना मेयस्थितिः, तदभावे तयोः सद्व्यवहारविषयत्वं कथम्'' इति।[१०]

**प्रमाणानां खण्डनमेव ग्रन्थस्य मुख्यो विषयः**–न्यायदर्शनोक्तस्य प्रत्यक्षलक्षणस्य 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्'[११] इत्यस्य साकल्योनोद्धरणं प्रस्तुत्य अव्यभिचारि–पदस्य विषये विकल्पचतुष्टयस्य कल्पनां विधाय एकैकस्य खण्डने तर्कसन्ततेः घटाटोपं सृष्ट्वा ग्रन्थविषयमुपक्रमते जयराशिः। एतस्मिन् क्रमे जाति–समवाययोः खण्डनं विधाय 'अव्यभिचारि'पदं विस्तरेण प्रत्यक्षलक्षणान्निरस्तम्। तल्लक्षणस्थानि पदान्तराणि च क्रमेण निरस्तानि। एवमेव 'अर्थ'–पदस्य विषये चतुरो विकल्पान् उपस्थापयति – अनुपजातातिशयो वा, उपजातातिशयो वा, अव्यतिरिक्तोपजातातिशयो वा, व्यतिरिक्तोपजातातिशयो वा।[१२] सर्वेषां विकल्पानां व्यर्थीकरणे सति इन्द्रियार्थसंन्निकर्षे विज्ञानं प्रत्यक्षलक्षणत्वेन नैव ग्राह्यमिति साधयति ग्रन्थकारः।

मीमांसकाभिमतं प्रमाणलक्षणम् 'अनधिगतार्थगन्तृ प्रमाणम्' इत्यपि तेषामयुक्तवादितेति उपपाद्य निरस्यति। तत्प्रसङ्गे श्लोकवार्तिकश्लोकार्धमपि समुद्धरति– '**इदानीन्तनमस्तित्वं नहि पूर्वधिया गतम्**' इति।[13] तत्रैव बौद्धन्याये स्वीकृतस्य अविसंवादिज्ञानस्यापि[14] प्रमाणत्वं दूषितम्। अविसंवादि–पदस्यार्थस्य विषये पञ्च विकल्पाः प्रकल्पिताः, एकैकशः खण्डिताश्च। एकैकस्मिन् विकल्पेऽपि पुनर्विकल्पजालं प्रकल्पितम्, तत्तन्निरसनायेति खण्डनप्रणाल्या नूनमेव प्रतिपादिनो भयमाप्नुवन्ति।

कृत्स्नोऽपि ग्रन्थः प्रत्यक्षादीनां प्रमाणानां लक्षणखण्डनेऽभिनिविष्टः इति वितण्डात्मायम्। तत्रापि प्रत्यक्षानुमानयोः प्रमाणयोः असम्भवत्वसाधने अर्थात् तत्तत्प्राणयोः लक्षणकलापसत्त्वनिरसने ग्रन्थस्याधिको भागः समर्पितो वर्तते। मध्यभागेऽस्मिन्नेव प्रसङ्गे आत्मानुमानस्य जैनाभिमतस्य निरासः, सांख्याभिमतस्य कैवल्यस्य वेदान्ताभिमतानन्दरूपकैवल्यस्य च निरासः, मीमांसकदृशापि आत्मानुमानस्यासम्भवताऽपि तर्कबलेन दर्शिता जयराशिभट्टेनेति 'एका क्रिया द्व्यर्थकरी प्रसिद्धा' इति न्याय आश्रितः। ग्रन्थस्यान्तिमे भागे कतिपयेषु पृष्ठेषु (109-125) प्रमाणान्तराणां निरसनोपक्रमे क्रमशोऽर्थापत्त्युपमान-अभाव–संभवैतिह्य (पौराणिकसम्मत)–शब्दप्रमाणानामपि शास्त्रीयं खण्डनं व्याधायि ग्रन्थकृता। शब्दप्रमाणखण्डनस्यान्तिमत्वे पर्याप्तं कारणं वर्तते।

तद्धि व्याकरणशास्त्रस्य विषयं स्पृशति। पद–पदार्थसम्बन्धनिरूपणेन शब्दप्रमाणं व्याकरणशास्त्रं च संगच्छेते। जयराशिर्मूलतः शब्दार्थयोः सम्बन्धमेव निरस्यति। तथाहि, न तादात्म्यरूपो न च तदुत्पत्तिरूपः सम्बन्धः पद–पदार्थयोर्मध्ये उपपद्यते – 'न तावत्तादात्म्यलक्षणः तयोराकारभेदात्। नापि तदुत्पत्तिलक्षणः अर्थापायेऽपि शब्दोदय–दर्शनात्।'[15] अन्येऽपि विकल्पाः प्रकल्प्य निरस्ताः यथा– (क) नापि सामयिकः शब्दार्थयोः सम्बन्धः, (ख) नापि स्वाभाविकः शब्दार्थयोः सम्बन्धः, (ग) अथ अर्थापत्त्याऽनुमीयते, सापि अनुपपन्ना, प्रत्यक्षादिपूर्विका हि अर्थापत्तिः। एवं सम्बन्धमन्तरेण पदानां वाचकत्वं न युज्यते।[16]

क्रमेण पतञ्जलि–भर्तृहरिमतं प्रस्तुवन् ग्रन्थकारः प्रक्रमते – ''अन्ये तु साधुपदशब्दादर्थप्रतिपत्तिं वर्णयन्ति, साधुत्वं च लक्षणयोगित्वम्, लक्षणं च सूत्राण्येव, लक्ष्यं गौरित्यादिपदम्। अथ किमिदं नाम यल्लक्षणेन परमर्षिगदितेन सूत्रकलापेन लक्ष्यते? किं गकारादयो वर्णाः, वर्णेभ्योऽर्थान्तरं वा पदं स्फोटरूपम्?''[17] उभयोरपि पक्षयोः पुनर्विकल्पसन्ततिरुत्थापिता। विकल्पानां चासाध्यता-प्रर्दशनेन न कुत्रापि व्यवस्था शक्यतेऽवस्थापयितुम्। अपि च, व्याकरणसूत्राणां लक्षणत्वविषयेऽपि विकल्पमात्रं

प्रकल्पितमिति मूलप्रश्नावलोपे सति न किमपि सिद्धं स्यात्। सर्वाणि तत्त्वानि उपप्लुतानि क्रमेण सिंहरूपेण तर्कजालेनेति ग्रन्थकारस्याशयः। यथा मायावादिवेदान्तमतेन व्यवहाराः मायामये संसारे एव घटन्ते, तथैव उपप्लुतेषु तत्त्वेषु एव अविचार–रमणीया व्यवहाराः चलन्ति– इत्येव जयराशिरुपसंहरति ग्रन्थान्ते।

सिद्धान्तानां खण्डनक्रमेण क्वचित्क्वचित् जयराशिभट्टो व्यङ्ग्यवचनप्रयोगेऽपि पाटवं दर्शयति यथा – अहो राजाज्ञा गरीयसी नैयायिकपशोः (पृ.6), शृण्वन्तु अमी बाललपितं विपश्चितः (पृ.5), मरीचयः प्रतिभान्ति देवानांप्रियस्य (पृ.12), न ह्यबालिश एवं वक्तुमुत्सहेत (पृ.38), तदेतन्मुग्धाभिधानं दुनोति मानसम् (पृ.38) इत्यादि। जैनानामनेकान्तवादनिरसनप्रसङ्गे भावाभावपर्यायमाक्षिपन् लेखकः कथयति – इमामेव मूर्खतां दिगम्बराणामङ्गीकृत्य उक्तं सूत्रकारेण–

**नग्न, श्रमण, दुर्बुद्धे, कायक्लेशपरायण।**
**जीविकार्थेऽपि चारम्भे केन त्वमसि शिक्षितः॥**

इह तु ज्ञातव्यं, यत् परवर्तिषु खण्डनविषयप्रसङ्गेषु समुत्थापितेषु प्रस्थानग्रन्थेषु तत्त्वोपप्लवसिंहस्य पद्धतिः सामग्री च गृहीता वर्तते। माधवाचार्यकृते सर्वदर्शनसङ्ग्रहे तु प्राचुर्येणैतद् द्रष्टुं शक्यते। परं तत्र तत्त्वखण्डनं तत्त्वान्तरस्थापनार्थमेवेति विशेषः। सर्वथापि तत्त्वोपप्लवसिंहः स्वपद्धतेरसामान्य एव ग्रन्थः एकाकी वितण्डाग्रन्थो भारतीयदर्शनसाहित्येऽयमिति।

*

**सन्दर्भाः**


1. न्यायसूत्रम् 1.2.1
2. न्यायसूत्रम् 1.2.2, यथोक्तोपपन्नश्छलजातिनिग्रहस्थान-साधनोपालम्भो जल्पः।
3. न्यायसूत्रम् 1.2.3
4. संवत् 1159 मार्ग. वदि 11 शनौ - इति हस्तलेखतिथिः।
5. तत्त्वोपप्लवसिंहः (बौद्धभारती संस्करणम्), भूमिकारूपेण पं. सुखलाल जी संघवीकृतो हिन्दीनिबन्धः, पृ.12
6. तत्त्वोपप्लवसिंहः, पृ.125

7. तत्त्वोपप्लवसिंहः (बौद्धभारती), हिन्दी भूमिका, पृ.8
8. सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि।। सांख्याकारिका, कारिका 72
9. तत्त्वोपल्लवसिंहः पृ.1 अथातस्तत्त्वं व्याख्यास्यामः-पृथिव्यापस्तेजो वायुरिति तत्त्वानि। तत्समुदाये शरीरेन्द्रियविषयसञ्ज्ञा।
10. तत्रैव, पृ.1
11. न्यायसूत्रम् 1.1.4
12. तत्त्वोपप्लवसिंहः, पृ.22
13. मीमांसाश्लोकवार्तिकम्, सूत्रम् 4, श्लोकः 234; तत्त्वोपल्लवसिंहः पृ.27
14. प्रमाणवार्तिकम् 2.1; तत्त्वोपल्लवसिंहः पृ.28
15. तत्त्वोपप्लवसिंहः, पृ.113
16. तत्रैव, पृ.114
17. तत्त्वोपप्लवसिंहः (बौद्धभारती), पृ.120

*

## किञ्चिद् रामायणीयम्

*** हनुमान् लङ्कां ददर्श। सा 'लङ्का' कीदृशी?**

- रावणपालिता
- सपद्माभिः सोत्पलाभिः परिखाभिः अलङ्कृता
- समन्तात् विचरद्भिः उग्रधन्वभिः राक्षसैः सुरक्षिता
- काञ्चनेन आवृता
- रम्या
- प्राकारेण महापुरी
- गिरिसंकाशैः शारदाम्बुदसंनिभैः गृहैः पाण्डुराभिः उच्चाभिः प्रतोलीभिः च अभिसंवृता
- अट्टालकशताकीर्णा
- पताकाध्वजमालिनी
- लतापङ्क्तिविराजितैः काञ्चनैः तोरणैः (अभिसंवृता)
- देवपुरी इव
- पाण्डुरैः शुभैः भवनैः (अभिसंवृता)
- राक्षसेन्द्रेण पालिता
- विश्वकर्मणा निर्मिता
- वप्रप्राकारजघना
- विपुलाम्बुवनाम्बरा
- शतघ्नीशूलकेशान्ता
- अट्टालकवतंसका
- मनसा कृता इव
- आशीविषैः गुहा इव घोरैः राक्षसैः सम्पूर्णा
- अचिन्त्या
- सुकृतस्पष्टा
- कुबेराध्युषिता
- शूलपट्टिशपाणिभिः दंष्टाभिः बहुभिः शूरैः रक्षिता
- सुरैः अपि युद्धेन जेतुं न शक्या
- विषमा
- (अत्र) राक्षसेषु न साम्नः, न दानस्य, न भेदस्य, नैव युद्धस्य अवकाशः

**आधारः - रामायणम्, सुन्दरकाण्डम्, 2 सर्गः**

*** हनुमतः पुरतः स्वयमेव उत्थिता 'लङ्का' नगरी कीदृशी आसीत्?**

- विकृताननदर्शना
- महानादं मुञ्चमाना
- विरूपनयना
- दारुणा
- कामरूपिणी
- निशाचरी
- (हनुमतः प्रहारेण) विह्वलाङ्गी
- (हनुमतः प्रहारेण) विनिपातिता
- (हनुमतः प्रहारेण) भृशम् उद्विग्ना
- लङ्कानगर्याः हनुमन्तं प्रति अगर्वितं वाक्यम् -

तत्प्रविश्य हरिश्रेष्ठ पुरीं रावणपालिताम्।
विधत्स्व सर्वकार्याणि यानि यानीह वाञ्छसि।।

**आधारः - रामायणम्, सुन्दरकाण्डम्, 3 सर्गः**

# जलसम्बद्धाः वैदिक्यो देवताः

**डॉ. रणजीत कुमारः**

जलशब्दस्य निघण्टौ[1] एकशतं पर्यायवाचिनामानि उपलभ्यन्ते। वस्तुतस्तु तत्र उदकनामसु जलपदस्य परिगणना दृश्यते। निरुक्तशास्त्रे उदकशब्दस्यैव निर्वचनम् उपलभ्यते न तत्पर्यायवाचिनाम्। अमरकोशे[2] वारिवर्गे जलशब्दस्य सप्तविंशतिः पर्यावाचिनः उक्ताः। पाणिनीयधातुपाठे जलधातुर्द्विधा पठितः। जल घातने इति भ्वादिगणीयो धातुः (घातनं तैक्ष्ण्यम्, जलति) तथा च जल अपवारणे इति (अपवारणम्, पिधानम्, आच्छादनम्, जालयति, जालयते) चुरादिगणीयो धातुः। जलधातोः क इति प्रत्ययं कृत्वा कर्त्रर्थे जलशब्दो निष्पद्यते। जालयति चन्द्रं मेघः। जलार्थे संहितासु अप्शब्दस्य प्रयोगो दृश्यते। देवताविषये निरुक्तशास्त्रानुसारं सिद्धान्तरूपेणैकेश्वरवादो निरूपितः यथा–

**महाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते।**
**एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति।।**[3]

इत्यस्य मूलम् ऋग्वेदे वर्तते।

**इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।**
**एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।।**[4]

यजुर्वेदेऽपि श्रूयते–

**तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।**
**तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः।।**[5]

अथर्ववेदेऽपि–

**स नः पिता जनिता स उत बन्धुर्धामानि वेद भुवनानि विश्वा।**
**यो देवानां नामध एक एव तं सं प्रश्नं भुवना यन्ति सर्वा।।**[6]

एवं यद्यपि एकमेव सद् ब्रह्म विद्यते परन्तु असौ अनेकधा बहुविधैर्नामभिः स्तूयते। कार्याणि दृष्ट्वा तस्य अनेकानि नामानि ज्ञायन्ते। कार्यवैविध्येन नानादेवत्वम् इत्यभिप्रायः। यथोक्तं पूर्वम् एकस्य आत्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति। इत्थं

जलकार्येणापि तस्य स्तुतिर्वेदेषु विविधनामभिर्दृश्यते। तत्र यद्यपि यावन्ति जलरूपाणि तावत्यो जलसम्बद्धा देवताः स्युः। परन्तु तेषु जलसम्बद्धं समग्रं स्वरूपम् अब्देवतायाः स्तुत्या तासां कर्मणां वर्णनेन एव स्पष्टं भवति। जलप्राप्तिर्वृष्ट्या भवति। अतो वृष्टिकारिकाः सर्वाः अपि देवताः जलसम्बद्धाः इति वक्तुं शक्यते। इत्थं जलसम्बद्धा प्रमुखा देवता अब्देवता वर्तते वृष्टिकारकत्वात् अथ च पञ्च देवताः अन्याः सन्ति। वेदेषु जलसम्बद्धाः आहत्य षट् देवताः स्तुत्याधारेण सन्ति।

1. आपः 2. पर्जन्यः 3. मरुतः 4. आदित्यः 5. वरुणः 6. इन्द्रः।

परन्तु एतेषु आपो देवता एव प्रमुखा वर्तते।

**1. आपः-** अप्सम्बद्धानि चत्वारि सूक्तानि ऋग्वेदे सन्ति। तत्र प्रथमे मण्डले मेधातिथिदृष्टे त्रयोविंशतितमे सूक्ते 24 मन्त्राः सन्ति। तेषु–"**अर्धाष्टमा अपां ज्ञेया**"[7] इति शौनकः। सूक्तेऽस्मिन् अपां स्वरूपं वर्णितं यत् – आपः मातृस्थानीयाः, जामयः (हितकारिण्यो बन्धवः), मधुररसेन युक्ताः,[8] आदित्यमण्डलस्थाः, सूर्येणैकस्थानाः[9] वर्तन्ते। अप्सु अमृतं वर्तते। अप्सु भेषजं वर्तते।[10] अप्सु अग्निः वर्तते।[11] आपः शरीरे रोगनिवारिकाम् ओषधिं पूरयन्ति।[12] अत्र आपो न केवलं नित्यं व्यवह्रियमाणाः पेयजलरूपाः, अपितु सर्वपदार्थगतो रस एव आपः।

सप्तमे मण्डले सप्तचत्वारिंशस्य सूक्तस्य वसिष्ठो मैत्रावरुणिः ऋषिः, आपो देवता, त्रिष्टुप् छन्दः वर्तते। अत्र आपः शतपवित्राः[13] उक्ताः अर्थात् शतं नाम बहूनि पावनानि रूपाणि यासां ताः शतपवित्राः, एतेन अनुमीयते यत् सूक्तेऽस्मिन् अपां वृष्टिनदीकुल्यादिजलमेव न गृह्यते अपितु यत् किमपि जगति तरलपदार्थः वर्तते तत्सर्वं गृह्यते। आपः स्वधया नाम अन्नेन लोकान् प्राणिनः माद्यन्ति।[14] वस्तुतः विना आपः कृषिर्न सम्भवति, अपां कार्यरूपम् अन्नं वर्तते। आपो देवीः अर्थात् देव्यो द्योतमाना देवानां पाथः, स्थानम् अपि यन्ति नाम प्रविशन्ति।[15] अत्र कदाचिदन्तरिक्षस्थाः आपः वर्णिताः यत्र ताः परमाणुरूपाः सन्ति।

अग्रिमे मन्त्रे वृष्टिचक्रे वर्णितम्। सूर्यः रश्मिभिर्नाम स्वकिरणैः उदकसारं स्वीकरोति पुनः इन्द्रोऽन्तरिक्षे मेघान् ताडयन् गमनयोग्यं मार्गं प्रयच्छति। इन्द्रसूर्यौ देवौ वृष्टिकारकौ स्तः।[16]

अपां विषये ऋग्वेदस्य सप्तमे मण्डले नवचत्वारिंशे सूक्ते वर्णनं प्राप्यते यदापः सलिलस्य (अन्तरिक्षस्य) मध्यात् पुनानाः (विश्वं शोधयन्तः) गच्छन्ति। वज्री इन्द्रो

याः अपः रराद (निरुद्धाः अपः) ताः देवीः (दिव्याः) आपः माम् अवन्तु।[17] अत्र अपां मेघस्वरूपस्य वर्णनं वर्तते। इन्द्रदेवता वृष्टिकारको दृश्यते। आपो दिव्याः नाम अन्तरिक्षभवाः सन्ति, अपि च नद्यादिगताः सत्यः प्रवहन्ति, खनित्रिमाः अर्थात् कुल्याकूपादिरूपेण वर्तन्ते, स्वयंजाश्च सन्ति।[18] अपां राजा वरुण उक्तः।[19] वरुणः यासु अप्सु प्रविष्टः, सोमः यासु प्रविष्टः, सर्वे देवाः यासु अन्नं मदन्ति, अग्निर्वैश्वानरो यासु प्रविष्टः ताः आपः माम् अवन्तु।[20] अत्र अग्निः ऊर्जा इत्यर्थे प्रतीयते। अस्य सूक्तस्य ऋषिः मैत्रावरुणिः वसिष्ठः वर्तते।

दशममण्डलस्य नवमं सूक्तं प्रसिद्धतमं सूक्तं वर्तते। त्रिशिरास्त्वाष्ट्रः, सिन्धुद्वीप आम्बरीषो वा ऋषिः सूक्तस्यैतस्य। तत्र तिसृणाम् ऋचां नित्यसन्ध्यावन्दने स्मार्तयागेषु च मार्जने विनियोगो वर्तते। यजुर्वेदस्य माध्यन्दिनसंहितायाम् एते मन्त्राः एकादशेऽध्याये पठिताः।[21] आपो मयोभुवः अर्थात् सुखस्य भावयित्र्यः सन्ति। स्नानपानसम्यग्जरणादिना प्रकारेण सर्वस्य जगतः सुखस्य भावयित्र्यो भवथ।[22] आपः ऊर्जे – अन्नाय दधातन धत्त अर्थात् अन्नप्राप्तियोग्यान् अस्मान् कुरुत। अन्नमस्मभ्यं दत्तेत्यर्थः। महे महते रणाय रमणीयाय चक्षसे दर्शनाय ज्ञानाय ज्ञानप्राप्तियोग्यांश्चस्मान् कुरुतेत्यर्थः। चक्षसे इति पदस्य व्याख्यां कुर्वता महीधराचार्येण वेददीपभाष्ये उक्तं यत् चष्टे नाम पश्यति सर्वं येन इति चक्षः चक्षतेरसुन्प्रत्ययः। तस्मै चक्षसे। महद्रमणीयं दर्शनं ब्रह्मसाक्षात्कारलक्षणं तदस्माकं कुरुत। ऐहिकपारलौकिकसुखं ददतेत्यृचो भावः।[23] अत्र अन्नपानौषधादिरूपेण ऐहिकसुखप्राप्तिः, ज्ञानेन च पारलौकिकं सुखं प्रार्थ्यते। महत्त्वं ज्ञानस्य सर्वविषयत्वात्।[24] अत्र अपाम् ईश्वरत्वेनापि स्तुतिरुक्ता। द्वितीयमन्त्रे उच्यते यदपां स्वभूतः शिवतमः स्वादुर्बलारोग्यकरश्च यो रसः तं रसं अस्मान् सेवयत। अत्रापि आपः आरोग्यकारिका उक्ताः। अग्रे उच्यते ''**आपो जनयथा च नः**''[25] हे आपः! अस्मान् जनयथ सपुत्रान् रसानुप्रदानादिति।[26] अत्र जलं रजोवीर्यहेतुः उक्तः। **शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः** इत्येतस्याम् ऋचि प्रार्थ्यते यद्देव्यः आपः अस्माकं कल्याणाय भवन्तु, यज्ञार्थं भवन्तु पानाय च भवन्तु। अद्भिरुत्पन्नानां रोगाणां शमनं भवतु अनुत्पन्नानां पृथग्भावं चेति।[27] आपः वार्याणां वारिप्रभवानां व्रीहियवादीनाम् ईश्वराः सन्ति। मनुष्यार्थम् अपः भेषजं याचामि। भेषजम् इति सुखनाम। व्याधेः पापस्य वा अपनोदकं वस्तु। तदहं प्रार्थये।[28]

इत्थं चतुर्षु सूक्तेषु अपां स्वरूपम् उक्तम्। तेन जलस्य स्वरूपं स्पष्टं भवति। यजुर्वेदेऽपि बहुत्र अपां वर्णनं वर्तते। इमा आपः शमु मे सन्तु।[29] आपो अस्मान्मातरः

शुन्धयन्तु।[30] अत्र आपः मातृस्थानीयाः उक्ताः पावयित्र्यश्च कथिताः। सुमित्रिया न आप ओषधयः सन्तु।[31] आपः सुमित्रवद्भवन्तु। अन्ते च शान्तिरापः।[32] जलप्रलयाभावः प्रार्थितः।

अथर्ववेदे अपां सम्बद्धानि अनेकानि सूक्तानि वर्तन्ते। तत्र जलचिकित्सायाः बीजरूपेण वर्णनं प्राप्यते।

**आप इद् वा उ भेषुजीरापो अमीवचातनीः।**
**आपो विश्वस्य भेषजीस्तास्त्वा मुञ्चन्तु क्षेत्रियात्॥**[33]

तत्र आरम्भे एव प्रथमकाण्डस्य चतुर्थे, पञ्चमे, षष्ठे सूक्ते च अपां स्वरूपं वर्णितम्। प्रायः सर्वेषु काण्डेषु स्वल्पाधिकप्रमाणेन जलसम्बद्धं वर्णनं वर्तते।

**2. पर्जन्यः -** निरुक्तशास्त्रे पर्जन्यशब्दस्य निर्वचनं कुर्वता यास्काचार्येण कथितं यत् पर्जन्यः तृपेः। आद्यन्तविपरीतस्य। तर्पयिता जन्यः। अर्थात् पर्जन्यशब्दः तृपेः, तृप तृप्तौ (दि.प.) इत्यस्य धातोरन्तर्भावितण्यर्थस्य रूपम्। तर्पयति इति तृप् क्विप्, स एव जन्यो जनेभ्यो हितः। हितार्थे यत्। तृप् चासो जन्यश्चेति। तृप् शब्दस्य पर्भावः पर् जन्यः–पर्जन्यः। सर्वजनपदतर्पयिता भवति पर्जन्यः।[34] **परो जेता वा, जनयिता वा–** परः प्रकृष्टो जेता जनयिता वा पर्जन्यः। **प्रार्जयिता वा रसानाम्–** प्रकर्षेण अर्जयिता (संचेता) जलानाम् पर्जन्यः। दुर्गाचार्यः स्वभाष्ये पर्जन्यो मेघ इति निर्दिशति।

पर्जन्यसम्बद्धानि त्रीणि सूक्तानि ऋग्वेदे सन्ति। तत्र अत्रिदृष्टे पञ्चममण्डलस्य त्र्यशीतितमे सूक्ते पर्जन्यः स्तूयते। पर्जन्यो वृषभो वर्तते। अर्थात् अपां वर्षिता वर्तते। गर्जनशब्दं कुर्वन् क्षिप्रदानः पर्जन्यः ओषधीषु गर्भस्थानीयम् उदकं स्थापयति।[35] वृष्ण्यावतो वर्षकर्मवतः अस्माद् अनपराधो भीतः पलायते। पर्जन्यः स्तनयन् दुष्कृतो हन्ति।[36] गतमन्त्रे वृषभेति शब्देन अस्मिन् मन्त्रे च वृष्ण्यावतः शब्देन स्पष्टं भवति यत् पर्जन्यो वृष्टिकारिका देवता वर्तते। अतः अद्भिः तस्य सम्बन्धः। तृतीयमन्त्रे तु स्पष्टमेव आम्नातम् – **पर्जन्यः कृणुते वर्ष्यं नभः।** पर्जन्यः अन्तरिक्षं वर्षोपेतं कुरुते।[37] चतुर्थे च पर्जन्यः पृथिवीं रेतसा अवति।[38] पर्जन्यो देवः पृथिवीं रेतसा उदकेन रक्षति।

सप्तमे मण्डले एकाधिकशततमे सूक्ते द्व्यधिकशततमे सूक्ते च पर्जन्यस्य स्तुतिर्वर्तते। पर्जन्यः ओषधीनां वर्धयिता उदकानां वर्धकः सर्वस्य जगतः ईष्टे।[39] पर्जन्येन दत्तमृतमुदकं मां शतसंवत्सरजीवनार्थं पातु।[40] अत्र दीर्घायुषः कारणं जलं कथितम्।

एतेन वर्णनेन ज्ञायते यत् पर्जन्योऽपि जलदेवता एव। पर्जन्यो मेघरूपो वृष्टिकारको देवो वर्तते।

**3. मरुतः –** ऋग्वेदे द्विचत्वारिंशत्सूक्तेषु मरुतां स्तुतिर्वर्तते। एते रोगनिवारकाः इन्द्रसहायकाश्च सन्ति। जलप्रलयस्य देवताः वर्तन्ते। मरुतो वृष्टौ पर्जन्यस्य सहायकाः प्रतीयन्ते। **दिवो न वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः।** अर्थात् हे मरुतः यूयं दिवः अन्तरिक्षात् सकाशात् नः अस्मभ्यं वृष्टिं ररीध्वम् दत्त। वृष्णः वर्षकस्य अश्वस्य व्यापकस्य मेघस्य सम्बन्धिन्यः धाराः उदकस्य धाराः प्र पिन्वत प्रक्षरत।[41] अतः मरुतो जलसम्बद्धदेवताः अपि सन्ति।

**4. आदित्यः –** आदित्यः कस्मात् – आदत्ते रसानादत्ते भासं ज्योतिषाम्।[42]एतेन ज्ञायते यदादित्यः पृथिव्याः रसान् आदत्ते येन वृष्टिर्भवति। आदित्योऽग्निरूपो वर्तते। तस्य अनेकानि अन्यानि प्रमुखकर्माणि सन्ति परन्तु जलचक्रे तस्य सहायकत्वात् असौ जलसम्बद्धदेवतारूपेणापि स्तूयते।

**5. वरुणः –** वरुणः–वृणोतीति सतस्तस्यैषा भवति। [43]वरुणः इति कस्मात्? वृणोतीति सतः। सत इति कर्तृकारकाभिधानम्। आवृणोति ह्यं मेघजालेन वियत्। वृञ् वरणे (स्वा.उ.) धातोः उनन् प्रत्ययं कृत्वा गुणो णत्वञ्च।[44] ऋग्वेदे असौ वृष्टिकर्तृरूपेण अपि स्तुतः।

**नीचीनबारं वरुणः कबन्धं प्र ससर्ज रोदसी अन्तरिक्षम्।**
**तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम॥**[45]

यतोऽयं प्रसृजति द्यावापृथिव्यौ चान्तरिक्षं च महत्त्वेन, वरुणो मध्यमः। ततः स एव विश्वस्य सर्वस्य भुवनस्य भूतजातस्य राजा, तेन हेतुना नीचीनद्वारमधोबिलं मेघं कृत्वा यवमिव वृष्टिर्व्युनत्ति भूमिमिति।[46]

ऋग्वेदे द्वादशसूक्तेषु वरुणस्य स्तुतिर्वर्तते। वरुणो धृतव्रतो वर्तते, शासको वर्तते, पापकृतः दण्डयति। इत्थं वरुणस्य अन्यान्यपि कर्माणि परन्तु असावपि वृष्टिचक्रसहायकत्वात् अपां स्वामिरूपेण जलदेवतारूपेण स्तूयते।

**6. इन्द्र –** वैदिकदेवतासु इन्द्रः प्रमुखो देवो वर्तते। दाशतय्याम् उपपञ्चाशदधिकद्विशतसूक्तेषु इन्द्रस्य स्तुतिवर्तते। तस्य महान्ति कार्याणि वर्तन्ते, तेषु च कार्येषु वृत्रवधोऽपि प्रमुखं कार्यं वर्तते। निरुक्तशास्त्रस्य द्वितीयेऽध्याये एतस्य आख्यानस्य स्वरूपम् स्पष्टं भवति। तत्र नैरुक्तानां मते वृत्रो नाम मेघः – **तत्को वृत्रो? मेघ इति**

**नैरुक्ताः। त्वाष्ट्रोऽसुर इत्यैतिहासिकाः। अपां च ज्योतिषां च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति।**[47]

अपां च मेघोदरान्तर्गतानाम्। ज्योतिषां च वैद्युतानाम्। तेन हि वैद्युतेन ज्योतिषा मरुदावेष्टितेन इन्द्राख्येनोपताड्यमाना आपः प्रस्यन्दन्ते (वर्षभावाय प्रकल्प्यन्ते) तत्र एवं सति उदकतेजसोरितरेतरप्रतिद्वन्द्विभूतयोः उपमार्थेन रूपकल्पनया युद्धवर्णा युद्धेन रूपकाणि भवन्ति। न ह्यत्र यथाभूतं युद्धमस्ति। नहीन्द्रस्य शत्रवो भवन्ति। तथा च मन्त्रवर्णो भवति – अशत्रुरिन्द्र! जज्ञिष इति।[48] एतेन ज्ञायते यदिन्द्रस्य वृत्रवधकर्म वस्तुतो वर्षकर्म एव। अतः इन्द्रोऽपि जलसम्बद्धदेवतारूपेण सर्वदा स्तूयते।

एवम् उपर्युक्तवर्णनेन जलसम्बद्धदेवता वर्णिताः। एतेन वर्णनेन अपां स्वरूपमपि ज्ञायते। जलं जीवनमूलं वर्तते। चरकसंहितायां सूत्रस्थाने सप्तविंशतितमे अन्नपानविध्यध्याये जलवर्गे जलस्य स्थानभेदेन अष्टौ प्रकाराः उक्ताः। तस्य स्थानभेदेन कालभेदेन च गुणाः वर्णिताः। सुश्रुतसंहितायां सूत्रस्थाने पञ्चचत्वारिंशे अध्याये जलचिकित्सा विस्तरेण कथिता। जलेन विना जीवनस्य कल्पना अशक्या। अपां सर्वविधरूपैः ऋषयः परिचिताः आसन्। पञ्चमहाभूतेषु जलतत्त्वं गण्यते। अस्य पूर्वजाः सदुपयोगं कुर्वन्ति स्म, तदर्थं प्रेरयन्ति स्म। अस्माभिरपि देवतारूपेण श्रद्धापूर्वकं जलस्य उपयोगः करणीयः।

*

**सन्दर्भाः**


1. निघण्टुः, अध्यायः 1, खण्डः 12
2. अमरकोशः, वारिवर्गः 3, 4
3. निरुक्तम् 7.4
4. ऋग्वेदः 1.164.46
5. यजुर्वेदः 32.1
6. अथर्ववेदः 2.1.3
7. बृहद्देवता 3.97
8. ऋग्वेदः 1.23.16 अम्बयो यन्त्वध्वभिर्जामयो अध्वरीयताम्।
9. ऋग्वेदः 1.23.17 असूर्या उप सूर्ये याभिर्वा सूर्यः सह।

10. ऋग्वेदः 1.23.19 अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये।
11. ऋग्वेदः 1.23.20 अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः।।
12. ऋग्वेदः 1.23.21
13. ऋग्वेदः 7.47.3 शतपवित्राः स्वधया मदन्तीर्देवानामपि यन्ति पाथः।
14. ऋग्वेदः 7.47.3
15. ऋग्वेदः 7.47.3
16. सायणभाष्यम्, ऋग्वेदः 7.47.4 याः सूर्यो रश्मिभिराततान् याभ्य इन्द्रो अरदद्गातुमूर्मि।।
17. ऋग्वेदः 7.49.1 समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनाना यन्त्यनिविशमानाः। इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु।
18. ऋग्वेदः 7.49.2 या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजाः।
19. ऋग्वेदः 7.49.3 यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्।
20. ऋग्वेदः 7.49.4 यासु राजा वरुणो यासु सोमो विश्वे देवा यासमूर्जं मदन्ति। वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु।।
21. यजुर्वेदः 11.50-52
22. उद्गीथभाष्यम्, ऋग्वेदः 10.9.1
23. यजुर्वेदः 11.50
24. उद्गीथभाष्यम्, ऋग्वेदः 10.9.3
25. ऋग्वेदः 10.9.3
26. उद्गीथभाष्ये, ऋग्वेदः 10.9.5
27. वेङ्कटमाधवभाष्ये, ऋग्वेदः 10.9.4
28. उद्गीथभाष्ये, ऋग्वेदः 10.9.5
29. यजुर्वेदः 4.1
30. यजुर्वेदः 4.2
31. यजुर्वेदः 35.12
32. यजुर्वेदः 36.17
33 अथर्ववेदः 3.7.5
34. निरुक्तम् 10.1.10 श्रीमद्भगवद्दुर्गाचार्यकृत-ऋज्वर्थाख्यव्याख्या
35. मुद्गलभाष्ये, ऋग्वेदः 5.83.1

36. ऋग्वेदः 5.83.1
37. ऋग्वेदः 5.83.3
38. ऋग्वेदः 5.83.4
39. सायणभाष्यम्, ऋग्वेदः 7.101.2 यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे।
40. सायणभाष्यम्, ऋग्वेदः 7.101.6 तत्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः।
41. मुद्गलभाष्यम्, ऋग्वेदः 5.83.6
42. निरुक्तम् 2.4.13
43. निरुक्तम् 10.1.5
44. निरुक्तम् 10.1.5 श्रीमद्भगवद्दुर्गाचार्यकृत-ऋज्वर्थाख्यव्याख्या।
45. ऋग्वेदेः 5.85.3
46. निरुक्तम् 10.1.5 श्रीमद्भगवद्दुर्गाचार्यकृत-ऋज्वर्थाख्यव्याख्या।
47. निरुक्तम् 2.5.17
48. निरुक्तम् 2.5.17 श्रीमद्भगवद्दुर्गाचार्यकृत-ऋज्वर्थाख्यव्याख्या।

*

# प्रभुपादश्रीलजीवगोस्वामिनो दार्शनिकचिन्तनस्य एकः संक्षिप्तः परिचयः

**डा. अमल कुमार करः**

श्रीमद्गोपालभट्टमहोदयस्य कारिकाग्रन्थमवलम्ब्य श्रीपादजीवगोस्वामी स्वमहिम्ना षट्सन्दर्भं भागवतसन्दर्भं वा विरचितवान्। तत्त्वभगवत्परमात्मकृष्णभक्तिप्रीतिरूपैः षड्भिः सन्दर्भैः अयं विभक्तः। सन्दर्भो नाम तद्यत्र गूढार्थप्रकाशः विषयोक्तेः सारवत्ता श्रेष्ठता नानार्थसमावेशः वेद्यत्वम् इत्यादिकं परिस्फुटम्। षट्सन्दर्भस्य प्रथमेषु चतुर्षु सन्दर्भेषु सम्बन्धतत्त्वं, भक्तिसन्दर्भे अभिधेयत्वम्, प्रीतौ प्रयोजनतत्त्वं च व्याख्यातम्। प्रतिपाद्यविषयः श्रीभगवान् कृष्णः। स एवैकं तत्त्वम्। तत्र क्रमेण ब्रह्मपरमात्मभगवन्तः त्रिविधतया वर्णिताः। भारतीयदर्शने तु इमानि तत्त्वानि विविधतया व्याख्यातानि। जगदीश्वरविषये नास्तिकाः निरीश्वरवादिनः। आस्तिकेषु केचन ईश्वरं नाङ्गीकुर्वन्ति। किन्तु तेषां व्याख्यायां गौणरूपेण स परिलक्ष्यते। ईश्वरः साक्षान्मुख्यनिमित्तकारणस्वरूपः इत्युक्तं नैयायिकवैशेषिकैः। योगिनो वेदान्तिनश्च आत्मा परमात्मा ईश्वरः ब्रह्म इत्यादिभिः आख्याभिः आख्यान्ति। वैष्णवीयवैदान्तिकेन श्रीलजीवगोस्वामिना विरचिते षट्सन्दर्भे एतैस्तत्त्वैः सह कृष्णशक्तितत्त्वं नवतया समुपस्थापितमित्यस्मिन् विषये नास्ति कश्चित् सन्देहलेशः। मनः शुद्धं चेत् ईश्वरभजनेन सर्वदुःखनाशो भवति सुखप्राप्त्या च मोक्षः सम्भवति।

1430-1445 शकाब्दे आविर्भूतः श्रीलजीवगोस्वामी वैष्णवधर्मस्य चिन्तायां समाहितः सन् वैष्णवीयवेदान्तसिद्धान्तम् अभिनवरूपेण समुपस्थापितवान्। स बहुग्रन्थप्रणेता। तस्य बहुषु ग्रन्थेषु काव्यव्याकरणन्यायवैशेषिकसांख्ययोगमीमांसावेदान्तदर्शनपाण्डित्यं प्रकाशितं भवति। एतेषु दार्शनिकस्य श्रीलमहोदयस्य भागवतसन्दर्भः षट्सन्दर्भो वा अन्यः श्रेष्ठो ग्रन्थः। ग्रन्थोऽयं षड्भिः सन्दर्भैः परिपूर्णः - प्रथमः तत्त्वसन्दर्भः, द्वितीयः भगवत्सन्दर्भः, तृतीयः परमात्मसन्दर्भः, चतुर्थः कृष्णसन्दर्भः, पञ्चमः भक्तिसन्दर्भः, षष्ठश्च प्रीतिसन्दर्भः। सम्पूर्णग्रन्थे तस्य कुशाग्रसूक्ष्मं दार्शनिकज्ञानं श्रीमच्छङ्कराचार्यस्य मायामृगतृष्णिकायां प्रतप्तबालुकायां आत्मविसर्जनमकृत्वा प्रेमभक्तिसुधामये महासागरे मिलितं सत् बङ्गीयवैष्णवदर्शनसिद्धान्तं जगति प्रधानतमभगवत्तत्त्वज्ञापकत्वेन समुल्लिखितवत्।

भारतीयदर्शने ईश्वरवादिषु आस्तिकसम्प्रदायेषु पतञ्जलिकृते योगदर्शने ईश्वरस्यास्तित्वसाधकं वाक्यं हि-

**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।**[1] इति।

अर्थात् वेदकर्तृरूपेण वेदोक्तरूपेण च ईश्वरः सः। वेदस्याभ्रान्तत्वात् न केनचित् स्वल्पज्ञेन जीवेन सृष्टः सः। अवश्यमेव सर्वज्ञेन पुरुषेण ईश्वरेण स सृष्टः। किञ्च, परमात्मा ईश्वरः अस्ति यः सत्यमेव ईश्वररूपेण स्वीकृतः। उच्चतरनिम्नतरादिक्रमानुसारेण परिमाणानुसारेण च जडजगति परमाणुः सर्वाधमः आकाशश्च सर्वव्यापकः। एवमेव ज्ञानशक्तौ सर्वाधमः साधारणपुरुषः अल्पज्ञः सीमितज्ञानसम्पन्नश्च, ईश्वरश्च सर्वज्ञः सर्वशक्तः। तस्मात् ज्ञानशक्तेः परकाष्ठारूपेण ईश्वरः स्वीकृतः।

न्यायवैशेषिकौ ईश्वरवादिनौ। तेषां मते, ईश्वरो निमित्तकारणम्। यतो हि परस्परासंलग्नासंख्यपरमाणूनां संयोगे शृङ्खलितस्यास्य जगतः उत्पत्तिः व्याख्येया चेत् सर्वज्ञः सर्वशक्तिमान् ईश्वरः निमित्तकारणत्वेन स्वीकृतः। जीवस्य कर्मजन्या अदृष्टशक्तिः जगतो नियामिका भवितुं नार्हति। चैतन्यशून्यया अदृष्टशक्त्या ईदृशं शृङ्खलितजगद्वि-रचनमसम्भवम्। तस्मात् अदृष्टपरिचालकतया शक्तिस्वरूप ईश्वरः स्वीकृतः। वेदस्य प्रामाण्यप्रतिष्ठायै ईश्वरः स्वीकर्तव्यः। वेदरचयितृतया सर्वज्ञेश्वरस्य अस्तित्वं स्वीक्रियते चेत् वेदवाक्यं प्रमाणरूपेण ग्रहीतुं शक्यते। श्रुतावपि ईश्वरो जगत्कर्ता इत्युक्तम्। तस्मात् श्रुतिरपि ईश्वरास्तित्वे प्रमाणभूता।

विशिष्टाद्वैतवादिनो रामानुजस्य मते ब्रह्म ईश्वरो वा परमसत्। चित् अचित् च ईश्वरान्तर्गतम् अंशद्वयम्। ईश्वरस्य अचिदंशात् जीवजगतोरुत्पत्तिः। अनन्तैश्वर्यवान् ईश्वरः तदन्तर्गतात् उपादानात् जगत् सृष्टवान्। तस्मादेव ईश्वरः युगपत् उपादानकारणं निमित्तकारणं च। जगन्न मिथ्या। जीवजगती सत्यभूते चेदपि ईश्वराभिन्नतया तयोः स्वतन्त्रसत्ता नास्ति। ईश्वरे एव जीवजगतोरस्तित्वम्, ईश्वरेण सह जगतः सम्बन्धः भेदाभेदरूपः, ईश्वरः समग्रः जगच्च अंशमात्रमिति भेदो वर्तते तथा ईश्वरान्तर्भुक्तौ अभेदो विद्यते।

वैष्णवदार्शनिकः श्रीलमहोदयः तस्य भागवतसन्दर्भे श्रीमद्भागवततत्त्वमेव गृहीत्वा नवीनरूपेण उपस्थापितवान्। भारतीयदर्शने ऐश्वरिकभावना अन्यतमा श्रेष्ठदृष्टान्तस्वरूपा। षट्सन्दर्भे तस्य मतेषु प्रथमे तत्त्वसन्दर्भे तेनोल्लिखितं यत् ब्रह्म परमात्मा भगवान् - इत्येते सामान्यतया एकत्वेन प्रतीयन्ते चेदपि तत्त्वोपासकस्य सविधे श्रीभगवान् ब्रह्मस्वरूपः। तद्ब्रह्म अस्फुटं विशेषाकारं चेति श्रीभगवत्तत्त्वमेव असम्यक्तया आविर्भूतं

भवति। अतो भगवत्तत्त्वस्य वर्णनाय ब्रह्मतत्त्वस्य प्रकाशः स्वत एव जायते। अस्य ब्रह्मणः सजातीयविजातीयभेदौ न स्तः। किन्तु स्वगतभेदो वर्तते। इदं ब्रह्म निरंशं निर्गुणं वा नास्ति। अपि तु, सगुणं निखिलकल्याणगुणाकरभूतमिति कृपादिगुणानामाकार-विशेषत्वात् तत् ब्रह्म सविशेषं, न तु निर्विशेषम्। अखण्डानन्दस्वरूपतत्त्वं परमहंसवृन्दानां साधने अविविक्तशक्तिमत्त्वरूपेण अनुभूयते इति तद् ब्रह्म। योगिनां सविधे स एव परमात्मस्वरूपः। अर्थात् योगिनां हृदयात् किञ्चिच्छक्तिविशिष्टरूपेण अनुभूतो भवति अयं परमात्मा तथा भक्तिमार्गावलम्बिनां कृते भगवत्स्वरूपः। स एव स्वयं श्रीकृष्णादभिन्नः। भगवत्परमहंसगणस्य भक्तिभावितान्तःकरणेन बहिरिन्द्रियसमूलेन च परिस्फुटः विविक्तशक्तिशक्तिमत्त्वरूपेण भगवान्। अर्थात् शक्तिरूपविशेषणविशिष्टं परिपूर्णरूपेण विभावितमखण्डतत्त्वमेव श्रीभगवान्।

अस्य सन्दर्भस्य मङ्गलाचरणे कृष्णचैतन्यानुरागी स भागवतपुराणस्य एकं श्लोकं समुद्धृतवान्–

**कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्रपार्षदम्।**
**यज्ञैः सङ्कीर्तनप्रायैर्यजन्ति हि सुमेधसः॥**[2]

यस्य चिन्मयसत्ता ब्रह्म इति नाम्ना अभिहिता, यस्यांशभूतः कारणार्णवशायी सहस्रशीर्षाः पुरुषः सङ्कर्षणः मायाशक्तिं वशीकृत्य स्वीयांशान् मत्स्यादिलीलावतारान् प्रकटितवान् स स्वयं भगवान् माधुर्यप्रधानमूर्तिः श्रीकृष्णः तस्य भक्तेभ्यः प्रेम वितरति। तस्मात् मङ्गलाचरणे एव ऐश्वरिकभावनामयत्वं प्रकटितम्। ततस्तेन अष्टसु प्रमाणेषु शब्दप्रमाणमेव श्रेष्ठमित्युक्तम्। यतो हि भगवत्कथिता वाणी अभ्रान्ता। यत् अनादि तदेव सिद्धनिखिलैतिह्यमूलस्वरूपमहावाक्यपुञ्जं शब्दप्रमाणत्वेन स्वीकृतम्। शब्देनैव मनुष्यो विद्यालाभं कुरुते। शब्दो वेदो वा सर्वज्ञेश्वरस्य वाक्यम्।

द्वितीये भगवत्सन्दर्भे तेन श्रीभगवत्स्वरूपं निर्धारितम्। तदर्थं च भागवतात् विष्णुपुराणात् गीतायाश्च विविधश्लोकाः उद्धृताः–

**वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।**
**ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥**[3]

ब्रह्मभगवतोः व्याख्यायां कृतायां परमात्मनो व्याख्या स्वत एव सिध्यति। तस्मात् प्रथमं ब्रह्मस्वरूपविषये उक्तम्– ये तदखण्डमानन्दस्वरूपतत्त्वं तथा ये परमहंसाः जडासक्तिशून्याः महायोगिनः साधनबलेन तादात्म्यं ब्रह्मभूतत्वं वा सम्प्राप्य पारमेष्ठ्यं

ब्रह्माद्यानन्दं वा अवज्ञातवन्तः, किन्तु तत्त्ववस्तुनः स्वरूपशक्तौ वैचित्र्ये सत्यपि तद्ग्रहणे असमर्थास्तेषां चित्ते तत् तत्त्ववस्तु यथा सामान्यतया वैशिष्ट्यरहिततया वा परिलक्ष्यते तथैव प्रकाशं प्राप्नोति। तादृशी अपृथग्भूता शक्तिः शक्तिमत्ताहेतुश्च अभिन्नरूपेण प्रतिपन्नः सन् ब्रह्मशब्दवाच्यो भवति।[4]

किञ्च, तदेकं तत्त्वं स्वरूपभूतशक्तेर्योगे किञ्चिद्विशिष्टभावधारणेन इतरशक्तीनां प्रधानाश्रयभूतम्। तदनुभवजन्यानन्दपुञ्जान्तर्भुक्तस्तादृशो ब्रह्मानन्दानुभवः भागवतपरमहंसानां तादृशानुभवस्य साधनोपायः, तस्य स्वरूपभूता आनन्दरूपा ह्लादिनी वा शक्तिः वृत्तिविशेषरूपभक्तिभावविशिष्टा अन्तःस्था च। अपि च, बाह्येन्द्रियेष्वपि स्फूर्तिं प्राप्य अभिन्नशक्तिशक्तिमत्तत्त्वरूपेण प्रतिपन्नः सन् भगवच्छब्दशब्दितो जातः।[5]

विष्णुपुराणे भगवत्स्वरूपविषये तेनोक्तम्– समग्रैश्वर्यवीर्ययशःश्रीज्ञानवैराग्याणि षट् प्रसिद्धयो नामानि वा। भगस्तथा भूतसमूहस्य आत्मतत्त्वम्, भगवति भूतानां वासः, तस्य च भूतसमूहे वासः। इदं वकारस्यार्थः अर्थात् सः अव्ययतत्त्वस्वरूप इत्युच्यते। तेनोक्तम् - हेयप्राकृतगुणातीतानि समग्रज्ञानशक्तिबलैश्वर्यतेजांसि भगवच्छब्देन उक्तानि। एतावत् सर्वमपि विशेष्यं विशेषणं विशिष्टत्वमिति विवेचनीयम्। अतो ब्रह्मस्वरूपं भगवच्छब्देन वाच्यम्, न तु लक्षणेन लक्षणीयम्। तस्मादेव भगवच्छब्दस्तस्य वाचकः इति निर्धारितम्। यथा गङ्गाशब्दः नदीविशेषस्य वाचकः, न तु तटशब्दवत् लक्षकः।

अस्य सन्दर्भस्य अन्तिमभागे ब्रह्मरूपेण यः प्रकाशस्तत्र श्रीभगवतो वैशिष्ट्यं सविशेषत्वमनुपलब्धमिति ब्रह्मलक्षणे भगवतः प्रभा कथिता। प्रसङ्गेऽस्मिन् श्रीदेवकीदेव्या सद्योजातं भगवन्तं श्रीकृष्णं प्रत्युक्तम्–

**रूपं यत्तं प्राहुरव्यक्तमाद्यं ब्रह्मज्योतिर्निर्गुणं निर्विकारम्।**
**सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः॥**[6]

हे देव, वेदाः यत् अव्यक्तं वस्तु आद्यं जगत्कारणं ब्रह्म ज्योतिः निर्गुणं निर्विकारं निर्विशेषं केवलसत्त्वमयं निरीहं निष्क्रियं वा इति वर्णयन्ति भवानेव साक्षात्स सर्वतत्त्वप्रकाशको विष्णुः। ब्रह्मज्योतिर्विषये उक्तम्– ब्रह्म एव यस्य ज्योतिः प्रभा तादृशं रूपमर्थात् श्रीविग्रहः। ब्रह्मसंहितायामिदमुल्लिखितम्– यस्य प्रभोत्पत्तिवशात् उपनिषदुक्तं निर्विशेषं ब्रह्म कोटिब्रह्माण्डगताया असीमवसुधादिविभूतेः भिन्नं सत् निष्कलानन्ताशेषतत्त्वरूपेण प्रतीयते तमेव आदिपुरुषं गोविन्दमहं भजे।[7]

मुक्तिविषये उक्तम्– ''मुक्तिर्हित्वा अन्यथारूपं स्वरूपेण व्यवस्थितिः'' इति।

अर्थात् बद्धावस्था जीवस्य अन्यथारूपं, मुक्तिस्तु स्वस्वरूपेऽवस्थानम्। स्वरूपात् अन्यथाभावः बद्धता संसारो वा, संसारहेतुश्च अविद्याशक्तिः। सैव भगवद्बहिर्मुखं कार्यं सम्पादयति। अन्या च शक्तिः चतुर्वर्गेष्वन्यतमस्य मोक्षस्य सम्पादिका। या शक्तिः कल्पनारूपा सा चिच्छक्त्यंशभूता। यतो हि सा अन्तर्मुखी ज्ञानभक्तिस्वरूपा। स्वरूपान्यथारूपो यः संसारस्तस्य छेदिका सा इत्थं यावत्पर्यन्तं भगवद्बहिर्मुखता तावत्पर्यन्तं कल्पनात्मकाविद्याशक्तिसमूहस्य प्रकाशात् इदं बहिर्मुखताप्रधानं यत् बुद्ध्यादिकं तत्तेषां ये सगुणनिर्गुणभगवत्तत्त्वसाक्षात्कारं न कुर्वन्ति इति सत्यम्। किन्तु यदा भगवदन्तर्मुखता भवति तदा अस्यां बुद्ध्यादौ चिच्छक्तेः प्रादुर्भावो भवतीत्यतः ये तं साक्षात्कुर्वन्ति ते त एव इति स्वीक्रियते।

ब्रह्मभगवत्स्वरूपयोः पश्चात् परमात्मप्रसङ्गः यः तृतीयसन्दर्भस्य विषयः। अत्र भगवत्स्वरूपस्य आंशिकप्रकाशः। श्रीपादमते यः श्रीभगवत्स्वरूपस्य जीवशक्तिमायाशक्त्योः धारकः स एव परमात्मा। एतदैश्वरिकशक्तिद्वयबलात् परमात्मरूपः श्रीभगवान् सम्पूर्णजीवलोकस्य अधिष्ठानविशेषः। अस्याः शक्तेः प्रकाशेनैव सम्पूर्णस्य जगतः सृष्टिस्थितिलयाः साधिता भवन्ति। इयं जीवशक्तिः मायाशक्तिश्च अवश्यमेव श्रीभगवतः स्वरूपात् स्वरूपशक्तेर्वा पृथक्तया परिगण्येते। स्वरूपशक्तेः भिन्नत्वात् श्रीभगवतो मूलशक्त्याधारात् बहिरवस्थानाच्च जीवशक्तिः परमात्मनः तटस्थशक्तिः मायाशक्तिः च प्रपञ्चस्य बहिरङ्गशक्तिरित्युक्तम्। इयं तटस्थशक्तिः बहिरङ्गशक्तिश्च न कदाचित् श्रीभगवतः स्वरूपशक्तिं प्रभावितां कुरुतः। यद्यपि परमात्मा श्रीभगवतः अंशतः प्रकाशः तथापि ब्रह्मस्वरूपवत् न नितान्तनिर्विशेषः। वस्तुतस्तु श्रीभगवतो विशिष्टभावप्रकाश एव परमात्मा।

प्रभूतमायाशक्तिविशिष्टः चिच्छक्त्यंशविशिष्टश्च परमात्मा। उक्तं च–

''**अन्तर्यामित्वमयमायाशक्तिप्रचुरचिच्छक्त्यंशविशिष्टः परमात्मा**''[8] इति।

श्रीभगवतः जीवशक्त्याश्रयभूतः परमात्मा समस्तजीवकुलस्य अन्तर्यामित्वेन प्रत्येकं जीवात्मानं परिचालयति–

''**सर्वान्तर्यामी पुरुष एव परमात्मत्वेन निर्दिष्टः**''[9] इति।

तस्मादेव तेन परमात्मा क्षेत्रज्ञ इति आख्यातम्–

''**मुख्यं क्षेत्रज्ञत्वं परमात्मन्येव**''[10] इति।

परमात्मा सर्वेषां जीवात्मनाम् अन्तर्यामिरूपेण वर्तत इति स समष्टिक्षेत्रज्ञ इत्युच्यते।

जीवात्मा तु एकस्मिन्नेव जीवे वर्तत इति स व्यष्टिक्षेत्रज्ञ इत्युच्यते।

अस्य परमात्मनः प्रकाशः सामान्यतया त्रिधा भवति। इदमेव व्यूहतत्त्वमिति अभिधीयते। भगवत्पूजकानां पुरस्तात् परमात्मा सामान्यतः मूर्तित्रयरूपेण प्रकाशितो भवतीति वक्तुं शक्यते। तत्र प्रथममूर्तिः सङ्कर्षणो महाविष्णुरूपः। इत्थं स सम्पूर्णजीवप्रकृत्योः अधिष्ठातृदेवतारूपेण प्रकटितो भवति। उक्तं च–

''**महासमष्टिर्जीवप्रकृत्योरेकतापन्नयोर्द्रष्टेत्येक एव**''[11] इति

प्रकाशेऽस्मिन् जीवात्मप्रकृती विच्छिन्नतया तिष्ठतः। किञ्च, एतादृशप्रकाशे परमात्मा जीवस्य अन्तर्यामित्वेन नियन्तृत्वेन च अतिसूक्ष्मदशायां तिष्ठति। तदा स प्रद्युम्न इत्युच्यते। परमात्मा स्थूलदशायां मूर्तो भवति चेत् सः अनिरुद्ध इत्युच्यते। इत्थं परमात्मा प्रत्येकं व्यष्टिरूपे जीवे पृथक्तया अन्तर्यामिपुरुषरूपेण तिष्ठति यः व्यष्ट्यन्तर्यामिरूपेण प्रसिद्धः। एवमेव श्रीलमहोदयः भगवच्छक्तेः व्यूहतत्त्वं व्याख्याति।

परमात्मना सह विश्वस्य जीवतत्त्वस्य च यः सम्बन्धः स विस्तारितः। मायास्वरूपं सर्वा जीवशक्तिः मायाशक्तेरेव परिणामविशेषः इत्यादिकं मनोग्राहितया व्याख्यातं तेन। जीवशक्तिः परमात्मनः अंशभूता चेदपि भगवद्विमुखी अथवा भगवदुन्मुखो जीवः, परमात्मनः अभेदत्वं सर्वथापि विचारासहमित्यादिकं परिस्फुटम्। ब्रह्म परमात्मा श्रीभगवान् इत्येतैः त्रिभिः शब्दैः परमतत्त्वस्य निर्देशः श्रीभागवतपुराणे कृतश्चेदपि ते न समानार्थकाः इति ग्रन्थेऽस्मिन् सम्यक्तया प्रतिपादितम्।

चतुर्थे भगवतः श्रीकृष्णस्य नाम्ना अभिहिते कृष्णसन्दर्भे उक्तम्–

**यस्या वै श्रूयमाणायां कृष्णे परमपुरुषे।**

**भक्तिरुत्पद्यते पुंसां शोकमोहभयापहा॥**[12]

तस्मादत्र श्रीकृष्ण एव सर्वशक्तीनां पूर्णतमा अभिव्यक्तिरिति तस्य स्वयं भगवत्ता। स च सजातीयविजातीयस्वगतभेदशून्यः। उक्तं च–

''**कृष्णस्तु भगवान् स्वयं, कृष्णो वै परमदैवतम्**''[13] इति।

अन्यत्र भगवत्स्वरूपे श्रीकृष्णस्यैव स्वरूपशक्तेः विकासो वर्तते। स एव सर्वेषां भगवत्तामूलभूतः। श्रीकृष्णस्य भगवत्तायाः विनिःसृतास्ते इत्यतस्ते न स्वयं भगवन्तः। श्रीकृष्णस्य धाम नाम श्रीकृष्णलोकः यस्य द्वारका मथुरा गोकुलम् इति त्रिधा अभिव्यक्तिः। तत्रापि द्वारकामथुरापेक्षया श्रीगोकुलमेव स्वयंरूपं श्रीनन्दनन्दनस्य स्वकीयं धाम। धाम्नः वैशिष्ट्योल्लेखे हेतुस्तु अपरभगवत्स्वरूपाणां विविधधाम्नां सामान्याभिधानं

परव्योम। गोलकधाम्नस्तु वैशिष्ट्यविशेषो वर्तते। अस्याः परव्योमस्थाया धामसमष्टेः बहिः सिद्धलोकः इत्याख्यः एको निर्विशेषो ज्योतिर्मयो लोको वर्तते यत्र निर्विशेषब्रह्मणो धाम अस्ति।

श्रीकृष्णस्यैव विलासमूर्तिः परव्योमाधिपतिः चतुर्भुजो नारायणः वासुदेवसङ्कर्षण-प्रद्युम्नानिरुद्धाख्ये चतुर्व्यूहे वर्तमानः। सङ्कर्षणस्य अंशावतारः सहस्रशीर्षाः पुरुषः कारणार्णवे वर्तते। अस्य नामान्तरं महाविष्णुः। अस्यैव पुरुष इति संज्ञान्तरम्। महाप्रलये जीवनिचयः अस्यैव शरीरे तिष्ठति तथा सृष्टेः प्रारम्भे भगवदिच्छया साम्यावस्थापन्नां त्रिगुणात्मिकां प्रकृतिं प्रति आब्दृष्ट्या शक्तिसञ्चारं कुरुते निजदेहे लीनजीवनिवहे समर्पणं च कुरुते। ब्रह्मविष्णुरुद्रेषु त्रिविधमूर्तिषु क्रमेण रजोगुणमवलम्ब्य ब्रह्मा चतुर्दशभुवनानां व्यष्टिजीवानां च सृष्टिं करोति। तमोगुणम् अङ्गीकुर्वन् रुद्रः प्रलयकाले ब्रह्माण्डं विनाशयति। श्रीविष्णुस्तु सत्त्वगुणं प्रति दृष्टिनिक्षेपेण ब्रह्माण्डपालनं करोति। अत्र विष्णुः व्यष्टिरूपः जीवान्तर्यामी चतुर्भुजस्वरूपः। क्षीरसमुद्रे अवस्थानात् स क्षीरोदशायी तृतीयपुरुषः अनिरुद्धो भवति। पुरुषत्रयमेव अन्तर्यामि। तस्मात् परमात्मा नियन्ता सः। पुरुषत्रयस्य कार्यं बहिरङ्गमायाशक्त्यवलम्बनेन भवति। अयमेव अंशांशिहेतुः। स्वयं भगवान् श्रीकृष्णस्य अंश एव वर्तते। अन्तर्यामिणि शक्तिविशेषात् अन्तर्यामि परमात्मवृन्दं शक्तिविकाशविहीनात् निर्विशेषब्रह्मणः श्रेष्ठम्। एतेषामंशित्वात् परमव्योमाधिपतिः श्रीनारायणः परमात्मवृन्दात् श्रेष्ठः। श्रीनारायणात् द्वारकामथुराधिपतिः श्रीकृष्णः श्रेष्ठः, तस्माच्च श्रीभगवान् नन्दनन्दनः श्रीकृष्णः सर्वदा श्रेष्ठः।

भक्तिसन्दर्भे भक्तेरेव अभिधेयत्वं श्रेष्ठत्वं च प्रतिपादितम्। शास्त्रविधौ मुख्यतया यस्य कर्तव्यस्योपदेशः स सर्वशास्त्रविधेयः अभिधेयश्च। अत्र भक्तिरेव अभिधेया। प्रथमोक्तस्य सन्दर्भचतुष्टयस्य प्रतिपाद्यः स्वयं भगवान् श्रीकृष्णः। भक्त्यैव स सेव्यः। भक्तिः जीवस्य स्वरूपोपलब्धौ साधनभूता तथा सैव परमधर्मभूता। सा च भक्तिः वैधी रामानुगा इति भेदेन द्विविधा। इमानि तथ्यानि सुष्ठु श्रीलमहोदयेन ग्रन्थे ग्रथितानि।

भक्तिधर्मस्य किं प्रयोजनं किं वा तस्य अभीष्टं फलं लक्ष्यं वा - इति प्रश्नान्तराणि सन्ति प्रीतिसन्दर्भे। आत्यन्तिकदुःखावसानेन आत्यन्तिकसुखप्राप्तिरेव सर्वेषामभीष्टा। तस्मात् शाश्वतः परमतम आनन्दश्च परमपुरुषार्थः। परन्तु भगवत्प्रीतिरेव जीवस्य परमपुरुषार्थः। जीवः भगवदंशभूत इत्यतः तेजोमण्डलरश्मिपरमाणुवत् परमचिदेकरसस्य श्रीभगवतः चित्परमाणुरेव जीवः। यतो हि जीवस्तस्य शक्तिः।

प्रकृतिविकारमयं यत् कर्तृत्वं तत् जीवस्य भवति। मायासम्बन्धात् तस्मादेव

जीवस्य संसारः। किन्तु भगवदनुभवादिरूपया भक्त्या मायान्तर्धाने जाते सति जीवस्य संसारनाशो भवति। भगवतः प्रीतिविधानमेव जीवस्य आनन्दानुभूतिः। श्रीभगवानेव जीवकृतप्रीतिधर्मस्य पर्यवसानम्। भगवत्प्रीतिः जीवस्य परमं प्रयोजनम्। मुक्तिः कैवल्यं वा श्रीभगवत्प्रीतिरेव इति गौडीयवैष्णवा मन्यन्ते। सा जीवश्रीभगवतोर्मध्ये स्वरूपगतं गाढसम्बन्धं स्थापयति। साधनभक्त्या या प्रेमभक्तिर्जायते तत्र परमानन्दस्वरूपस्य श्रीभगवतः आनन्दचमत्कारिता प्रकाशिता भवति। एवमेव भक्तभगवतोर्मध्ये परस्परसम्बन्धस्य अभिव्यक्तिर्भवति। भगवत्प्रीतिमयो यो रसः स विभावादिभावसंयोगेन अभिव्यक्तो भवति। शान्तदास्यसख्य-वात्सल्यमाधुर्यादिरतिभेदेन अस्य प्रीतिभावस्य तारतम्यम्। परमपुरुषार्थोऽपि लीलागतालोचनया परिपूर्णः प्रीत्याख्ये अन्तिमे सन्दर्भे।

भगवान् श्रीकृष्णः नराकारं परब्रह्म तथा तस्य तादृशोपासनमेव सर्वापेक्षया महत्त्वपूर्णम्। श्रीकृष्णस्यैव अन्यावताररूपेण परममङ्गलमयस्वभावस्य तादृशः परिचयो न लभ्यते यः तस्य गोकुललीलात्मके लीलाविलासे परिलक्ष्यते। तत्र व्रजवधूभिः सह तस्य सर्वलीलाशिरोमणिरूपः रासादिलीलाविकासः एव परमवैशिष्ट्यस्य परिचायकः। ह्लादिनीशक्तिरूपिण्या परमभक्तशिरोमणिभूतया महाभावस्वरूपिण्या सर्वगोपीजनश्रेष्ठया श्रीराधिकया सह रसिकेन्द्रस्य लीलामयस्य श्रीकृष्णस्य भजनमेव रागात्मिकाया भक्तेः परमतमं साधनम्। रासलीलैव निगूढं तत्त्वम्।

अन्ते इदमेव वक्तुं शक्यते यत् भारतीयदर्शनस्य प्रतिशाखासु दुःखनिवृत्तिः सुखप्राप्तिश्च परमलक्ष्यभूते–इदमेव प्रयोजनतत्त्वं वर्णितम्। तत्र प्रत्येकं मतानि अपि विजातीयानि सन्ति। किन्तु वेदान्तदार्शनिकैः यानि तत्त्वानि समुपस्थापितानि तेषां सम्मानपुरःसरं वैष्णवीयवैदान्तिकेन श्रीलजीवगोस्वामिना गीतापुराणोपनिषदादीनां मतान्युल्लिख्य स्वशैल्या स्वमतं व्याख्यातं यच्च अनन्यं अद्भुतं च। वस्तुतस्तु अनिर्वचनीयसाधनबलेन स भगवत्कृपालाभे समर्थो जातः। प्रत्येकं जीवेनापि तत्रैव मेलनं काम्यमिति विवक्षा तस्य।

*

**सन्दर्भाः–**

1. योगसूत्रम् 1.24, 2. तत्त्वसन्दर्भः-कारिका 1, 3. भागवतपुराणम् 1.2.11, 4. भगवत्सन्दर्भः-कारिका 6, 5. भगवत्सन्दर्भः - कारिका 7, 6. भागवतपुराणम्10.3.24, 7. ब्रह्मसंहिता 5.40, 8. परमात्मसन्दर्भः-कारिका 65, 9. तदेव-कारिका 30, 10. तदेव-कारिका 9, 11. तदेव-कारिका 34, 12. कृष्णसन्दर्भः-कारिका 57, 13 कृष्णसन्दर्भः-कारिका 28

*

# महाभाष्यप्रदीपप्रकाशदिशा 'अथ शब्दानुशासन'मिति ग्रन्थविमर्शः

**राजकुमार मण्डलः**

## 1. उपोद्घातः

वाग्व्यवहारमाश्रित्य चिन्तनं तु प्राचीनकालादेव प्रवहद् वर्तते। तस्मादेव कारणाद् बहूनि व्याकरणानि प्रणीतानि प्राचीनैः। तत्र लौकिकवैदिकसाधारणत्वात् पाणिनिव्याकरण-स्यैव प्राधान्यं सर्वैरङ्गीक्रियते।

परम्परया आगतस्य शिष्टाभ्यनुज्ञातस्य संस्कृतव्यपदेशभाजः प्रयोगस्य अनुशासने तावदस्ति प्रयोजनम्। वस्तुतः शिष्टैः यानि पदानि उच्चार्यन्ते तानि सर्वाणि साधुन्येव भवन्ति। शिष्टास्तावत् क इति प्रश्ने भाष्यकारैः उच्यते– "**आर्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गतास्तत्रभवन्तः शिष्टाः**"[1] इति। अत्र संशयो यत् शब्दानां साधुत्वे यदि शिष्टा एव प्रमाणभूताः, तर्हि व्याकरणशास्त्रेण किं विधीयते? वस्तुतः शिष्टपरिज्ञानायैव व्याकरणशास्त्रं प्रवृत्तमिति मन्तव्यम्। एवञ्च शिष्टप्रयोगाः प्रधानम्, उपसर्जनं व्याकरणशास्त्रम्। तत्र शिष्टैः प्रयुक्तानामेव व्याख्यानं व्याकरणे क्रियते। तस्माद् व्याकरणस्य अन्वाख्यानस्मृतिरित्यपि नामान्तरं वर्तते।

पाणिनिव्याकरणस्य त्रिमुनिव्याकरणमिति ख्यातिः। सूत्रकारः पाणिनिः, वार्तिककारः कात्यायनः, भाष्यकारः पतञ्जलिरिति त्रयो मुनयः। तत्रेष्टिघटितहेतुकमहत्त्वविशेषणसमन्वित-पतञ्जलिविरचितमहाभाष्यग्रन्थस्य आदिममाह्निकं हि पश्पशाह्निकम्। व्याकरणशास्त्रस्य उपोद्घातात्मकमिदमाह्निकं वर्तते।

## 2. शोधविषयः

व्याकरणशास्त्रस्य त्रिमुनिव्याकरणमिति प्रसिद्धिः। तत्र आदौ भगवान् पाणिनिः अष्टाध्यायी इति सूत्रात्मकग्रन्थं व्यरचयत्। ततः सूत्राण्याश्रित्य कात्यायनप्रभृतयः उक्तानुक्त-दुरुक्तात्मकानि वार्तिकानि व्यरचयन्। ततः भगवान् पतञ्जलिः वार्तिकानि सूत्राणि

चाऽश्रित्य महाभाष्यग्रन्थं व्यरचयत्। भगवतः पाणिनेरादिमं वचनं हि ''वृद्धिरेचि'' (1.1.1), आदिमं वार्तिकं हि ''सिद्धे शब्दार्थसम्बन्धे'', आदिमं भाष्यवचनं हि ''अथ शब्दानुशासनम्'' इति।

अस्मिन् शोधपत्रे महाभाष्यप्रदीपप्रकाशव्याख्यानदिशा ''अथ शब्दानुशासनम्'' इति आद्यस्य भाष्यवचनस्य समीक्षात्मकमध्ययनं प्रस्तूयते। तत्र आदौ महाभाष्यप्रदीपप्रकाश-ग्रन्थस्य परिचयः दीयते। ततः ''अथ शब्दानुशासनम्'' इति भाष्यकृद्वचनस्य भाष्यद्व्याख्यानम्, प्रदीपकृतव्याख्यानं, महाभाष्यप्रदीपप्रकाशकृतं व्याख्यानञ्च क्रमशः प्रस्तूयन्ते। अन्ते महाभाष्यप्रदीपप्रकाशकृतव्याख्यानस्य विमर्शः यथामति प्रतिपाद्यते।

### 3. महाभाष्यप्रदीपप्रकाशग्रन्थपरिचयः

कैयटप्रदीपस्य उपरि उपलब्धासु टीकासु प्रवर्तकोपाध्यायकर्तृकविरचिता महाभाष्यप्रदीप-प्रकाशनाम्नी टीका अन्यतमा। अस्याः टीकायाः महाभाष्यप्रदीपप्रकाशिका, प्रदीपस्फूर्तिरिति नामद्वयमपि प्राप्यते। तत्र महाभाष्यप्रदीपप्रकाशः, महाभाष्यप्रदीपस्फुर्तिरिति नामद्वयं प्रकाशव्याख्याने दृश्यते। प्रत्येकम् आह्निकस्य अन्तिमे प्रायः माहभाष्यप्रदीपप्रकाशेति नाम दृश्यते। केवलं, द्वितीयाध्यायस्य प्रथमपादस्य द्वितीयाह्निकस्य समाप्तौ प्रदीपस्फुर्तिरिति नाम प्राप्यते।[2] महाभाष्यप्रदीपप्रकाशिकेति नाम प्रकाशव्याख्याने तु नोपलभ्यते। पण्डितप्रवरेण युधिष्ठिरमीमांसकेन 'संस्कृत व्याकरणशास्त्र का इतिहास' इत्याख्ये ग्रन्थे महाभाष्यप्रदीप-प्रकाशिकेति नाम उल्लिखितम्।[3] एवञ्च, महाभाष्यप्रदीपप्रकाशः, महाभाष्यप्रदीपस्फुर्तिरिति नामद्वयं प्रकाशव्याख्यानोपलब्धं, महाभाष्यप्रदीपप्रकाशिकेति नाम तु युधिष्ठिरमहोदयस्य उल्लेखमात्रेण परिचितम्। परन्तु, त्रिषु नामसु महाभाष्यप्रदीपप्रकाश इति नाम्न एव आधिक्येन व्यवहारः दृश्यते।

अस्य ग्रन्थस्य श्रेयः आचार्यनरसिंहाचार्यं प्रत्येव गच्छति। पण्डिचेरिनगर्यां वर्तमानात् फ्रेञ्चभारतीयकलाविमर्शालयात् 1986 ख्रीष्टाब्दे अयं ग्रन्थः प्रकाशितः। नरसिंहाचार्यमहोदयेन षण्णां मातृकाणां पाठोद्धारेण ग्रन्थोऽयं सम्पादितः। यद्यपि नरसिंहाचार्यस्य महता परिश्रमेण ग्रन्थोऽयं सम्पादितः, तथापि सम्पूर्णभाष्यस्योपरि व्याख्यानमिदं नोपलभ्यते। प्राथमिकमध्यायद्वयं यावत् ग्रन्थोऽयमुपलभ्यते। अष्टाध्याय्याः प्राथमिके अध्यायद्वये प्रायः षट्शताधिकसूत्राणि सन्ति। प्रकाशव्याख्याने तु षट्शताधिकसूत्रेषु 316 सूत्राणां व्याख्यानमुपलभ्यते। अत्रापि ''सुप्तिङन्तं पदम्'' (अष्टाध्यायी, 1.4.14) इति सूत्रात् ''विरामोऽवसानम्'' (अष्टाध्यायी, 1.4.110) इति सूत्रपर्यन्तं व्याख्यानमिदं नोपलभ्यते।

अस्मिन्ननुपलब्धे ग्रन्थभागे कारकप्रकरणं प्रायः पूर्णतया अन्तर्भवति। एवं, द्वितीयाध्याया-वध्यन्तर्भूतस्य कारकप्रकरणस्य व्याख्यानं पूर्णतया नैव उपलभ्यते। तथापि, उपलब्धेषु ग्रन्थभागेषु प्रवर्तकोपाध्यायमहोदयस्य सर्वशास्त्रनिष्णातत्वं स्फुटमेव प्रतीयते।

**ग्रन्थकृत्परिचयः** - अस्य व्याख्यानस्य कर्ता प्रवर्तकोपाध्यायः। प्रवर्तकोपाध्यायस्य कुलविषये देशविषये च किमपि नोपलभ्यते। परन्तु अस्य कालः पूर्वोत्तरग्रन्थावलोकनेन विद्वद्भिः विचारितः।

'महाभाष्यप्रदीपव्याख्यानानि' इति ग्रन्थे नरसिंहाचार्येण अन्नंभट्टकृतप्रदीपोद्द्योतेन महाभाष्यप्रदीपस्य अनुकरणं खण्डनञ्च प्रादर्शि। प्रदीपोद्द्योतनस्य प्रथमाह्निके च प्रकाशमतस्य अनुकरणं खण्डनञ्च भूयशः दृश्यते। गर्गादिविदादिपाठस्य प्रयोजनद्वयसाधनत्वप्रतिपादने द्विगता इति समस्तपदस्य प्रयोगः कृतः। अत्र प्रदीपप्रकाशे उद्द्योतने च द्विगतेति समस्तपदस्य द्वितीयासमासाङ्गीकारेण समानार्थकः संशय उपस्थापितः।[4] अस्मिन्नैव प्रसङ्गे अर्थधर्मविषयकः शब्दधर्मविषयकः प्रायः समानानुपूर्विविशिष्टः संशयः प्रतिपादितः।[5] एवं, प्रथमाह्निकस्य अन्तिमभागे बहुत्र उद्द्योतनकृता अन्नंभट्टेन प्रदीपप्रकाशस्य अनुकरणं कृतम्। द्वितीयाह्निकस्य प्रारम्भे उद्द्योतने प्रदीपप्रकाशस्य खण्डनमपि विहितम्। अकारस्य आकारस्य प्रयत्नभेदवत् कालभेदस्यापि सत्त्वात् भिन्नवर्णत्वं व्यक्तिपक्षे वक्तव्यमिति पक्षः भाष्ये उपस्थापितः। अत्र ''तुल्यास्यप्रयत्नं सवर्णम्'' (अष्टाध्यायी, 1.1.9) इति सूत्रेण आस्यान्तर्भूतस्य प्रयत्नशब्दबोधकत्वात् कालस्य च आस्यबहिर्भूतत्वात् वर्णभेदसाधकत्वं कालस्य नास्तीति सिद्धान्त उपन्यस्तः भाष्ये। वस्तुतः कालस्य गौणतया प्रयत्नत्वे सत्यपि वर्णभेदसाधकप्रयत्नत्वस्य अभावः भाष्ये सूचितः। अत्र प्रकाशकृता कालस्य गौणतया प्रयत्नत्वेन व्यवहारः खण्डितः। निमेषादिक्रियाकृतोऽयं कालव्यवहारः। निमेषादीञ्च इच्छापूर्वकत्वाऽभावात् कालस्य प्रयत्नत्वाऽभाव इति प्रकाशस्य आशयः।[6] उद्द्योतने अन्नं भट्टेन प्रदीपप्रकाशस्य मतमिदं खण्डितम्। अत्र निमेषादीनां क्रियात्वात् साध्यत्वाद्वा क्रियात्वात्मकसाधर्म्यं साध्यत्वात्मकसाधर्म्यं वाऽऽश्रित्य कालस्य प्रयत्नत्वरूपो गौणव्यवहारः युक्त इति अन्नंभट्टस्य मतम्।[7] अनेन सिद्धं यत् प्रवर्तकोपाध्यायः उद्द्योतनकृतः अन्नंभट्टस्य पूर्वकालिकः। अन्नंभट्टस्य कालः ई. 1550–1600 इति युधिष्ठिरमीमांसकमहोदयेन स्वग्रन्थे निरूपितम्।[8] तस्मात्, प्रवर्तकोपाध्यायः ई. 1550 इतीतः प्राग्वर्ती आसीदिति मन्तव्यम्।

वैद्यनाथपायगुण्डेमहोदयः महाभाष्यप्रदीपोद्द्योतनस्य छाया इति नाम्नीं व्याख्यां व्यरचयत्। महाभाष्यस्य वृद्धिरादैच् इति सूत्रस्य व्याख्यानं कुर्वतः पायगुण्डेमहोदयस्य

वचनेन प्रतीयते यत् विवरणटीकाकारं नारायणं प्रवर्तकोपाध्यायोऽखण्डयत्। पुनः, प्रवर्तकोपाध्यायेन कृतं खण्डनं नागेशेन उद्धृतम्।[9] एवं, प्रवर्तकोपाध्यायः विवरणकृतं नारायणं खण्डयति। तस्मात् प्रवर्तकोपाध्यायः विवरणकृतः नारायणात् परवर्ती। प्रवर्तकोपाध्यायस्य वचनं नागेश उद्धरति। तस्मात् प्रवर्तकोपाध्यायः नागेशात् पूर्ववर्ती। विवरणकृद् नारायणः 1654 ईशवीयाब्दात् पूर्वभावी। नागेशस्य कालः 1730–1810 ई.। पूर्वोक्तकालः नारायणस्य स्वीक्रियते चेत् प्रवर्तकोपाध्यायस्य कालः 1650 ईशवीयाब्दात् 1730 ईशवीयाब्दस्य मध्ये आपतति। परन्तु, नरसिंहाचार्यस्य वचनमनुसृत्य प्रवर्तकोपाध्यायः अन्नंभट्टात् पूर्ववर्ती। तथा च, नरसिंहाचार्यस्य पायगुण्डेमहोदयस्य च वचनस्य सार्थकाय विवरणकृतः नारायणस्य कालः अन्नंभट्टात् प्रागेव स्वीकर्तव्यः। तेन प्रवर्तकोपाध्यायस्य कालः 1550 ईशवीयाब्दात् पूर्वमेव स्वीकर्तव्यम्। युधिष्ठिरमहोदयोऽपि अमुममेव विचारं स्वग्रन्थे प्रत्यपादयत्।[10]

**4. महाभाष्यकृदर्थः**

भाष्यकारस्य आदिमं वचनं हि 'अथ शब्दानुशासनम्।' शब्दानाम् अनुशासनम् इति विग्रहे ''षष्ठी'' (अष्टाध्यायी, 2.2.8) इति सूत्रेण समासे शब्दानुशासनमिति समस्तपदं निष्पद्यते। अथ इति निपातः अधिकारार्थद्योतकः। अधिकारो नाम प्रारम्भः। एवञ्च, शब्दानुशासनम् आरभ्यते इति वाक्यस्यास्य अर्थः। अत्र, भाष्यकृता स्ववाक्यं व्याख्यातम्– ''अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्''[11] इति। एवं, शब्दानुशासनमिति व्याकरणशास्त्रापरपर्यायम्।

**5. प्रदीपनयः**

प्रदीपे आदौ 'अथ शब्दानुशासनम्' इति वाक्यप्रयोगस्य हेतुरुपन्यस्तः। व्याकरणशास्त्रस्य साक्षात्प्रयोजनं हि शब्दानुशासनम्। एवं, शब्दानुशासनपदं प्रयोजनसहितं व्याकरणशास्त्रमभिधत्ते। तस्मात्, शब्दानुशासनमिति अन्वर्थनाम। अत्र व्याकरणशास्त्रस्य साक्षात्प्रयोजनं प्रतिपादयितुं भाष्यकारः कथं प्रवृत्तः? अत्र हेतुत्वेन विवरणकारत्वादिति पदं प्रदीपे प्रयुक्तम्। यतो हि भाष्यकारो विवरणकारः, तस्मात् भाष्यकृता शास्त्रस्य प्रयोजनं प्रतिपादनीयम्। वस्तुतः, रक्षोहादयः व्याकरणशास्त्रस्य प्रयोजनत्वेन प्रसिद्धाः। तर्हि, शब्दानुशासनमिति प्रयोजनान्तरस्य कथने भाष्यकारस्य काऽपेक्षा। अस्य संशयस्य समाधानाय प्रदीपकारः प्रवृत्तः। शब्दानुशासनमिति व्याकरणशास्त्रस्य साक्षात्प्रयोजनम्। रक्षोहादीनि तु शब्दानुशासनरूपस्य प्रयोजनस्य प्रयोजनानि। एवमन्तरङ्गत्वात् साक्षात्प्रयोजनस्य कथमादौ युक्तमेव भाष्यकारस्य। तदुक्तं– ''भाष्यकारो विवरणकारत्वात्

व्याकरणस्य साक्षात्प्रयोजनमाह-अथ शब्दानुशासनमिति। प्रयोजनप्रयोजनानि तु रक्षोहादीनि पश्चाद्वक्ष्यन्ते''[12] इति।

एवं, भाष्यवाक्यस्य प्रवृत्तौ हेतुं प्रदर्श्य प्रदीपकारो भाष्यकृत्कृतव्याख्यानवाक्यस्य व्याख्यानमकरोत्। अथशब्दस्य अनन्तरम् इतिशब्दः प्रयुक्तः। अत्र इतिशब्दः स्वरूपावस्थापनार्थकः। अर्थात् इतिशब्देन अकाराद्यानुपूर्व्येव अथशब्देन ग्राह्यो भवति। पुनः, भाष्ये इतिशब्दादनन्तरम् अयमिति सर्वनाम्नः प्रयोगः कृतः। अथशब्दः अयमिति सर्वनाम्ना परामृश्यते। अत्र, अयमिति पदान्तरेण सह अथेत्यस्य सामानाधिकरण्यस्य उपपत्तये इतिशब्दस्य स्वरूपावस्थापनार्थकत्वम् अङ्गीकार्यम्। तदुक्तं प्रदीपकृता– ''इतिशब्दोऽथशब्दस्य स्वरूपेवस्थापनाय प्रयुक्तः। एवं हि पदान्तरैः सामानाधिकरण्येन सम्बन्धे सति अथशब्दो व्याख्यातुं शक्यते''[13] इति। अयमिति पदानन्तरं भाष्ये शब्दशब्दः पठितः। एवम् अथत्यंशस्य व्याख्याने अयम् अथशब्दः इत्यर्थस्य निश्चयो जायते। तस्मात्, भाष्यव्याख्यानवाक्यघटकत्वेन शब्दशब्दस्य प्रयोगो व्यर्थः। अत्र स्पष्टप्रतिपत्तये शब्दशब्दस्य प्रयोगः कृत इति समाधिः प्रदीपे प्रदर्शितः। भाष्ये अधिकारार्थ इति पदं प्रयुक्तम्। अधिकारः अर्थः प्रयोजनं यस्य इति विग्रहे ''अनेकमन्यपदार्थे'' (अष्टाध्यायी, 2.2.24) इति सूत्रेण बहुव्रीहिसमासे अधिकारार्थ इति समस्तपदं निष्पद्यते। अधिकारो नाम प्रस्तावः प्रारम्भो वा। एवम्, अथशब्दस्य प्रयोजनं हि अधिकारार्थस्य प्राप्तिः। प्रयोजनमिदं कथं सेत्स्यति। तत्र अथशब्दस्य निपातत्वात् निपातस्य च वाचकत्वाऽभावात् द्योतकत्वं सिद्धान्तितम्। एवम्, अधिकारार्थः अथशब्दद्योत्यः। एवम्, अथशब्दद्योत्यतया अधिकारार्थप्राप्तिरूपं प्रयोजनं सेत्स्यति। अनेन ''शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्''[14] इति भाष्यकृदुक्तार्थः लभ्यते। एवम्, अथशब्दसन्निधानेन प्रारम्भक्रिया-निरूपितकर्मत्वं शब्दानुशासनस्य निश्चितं भवति। एवं शब्दानुशासनस्य आरम्भः क्रियत इत्यर्थस्य प्राप्तिः भवति।

### 6. महाभाष्यप्रदीपप्रकाशमतम्

अत्र प्रदीपवाक्यघटकपदानां सार्थकतां प्रदर्शयितुं संशयात्मिका भूमिका प्रकाशकारैः सम्यक् प्रदर्शिता। अत्र शब्दानुशासनशब्देन व्याकरणशास्त्रं गृह्यते। एवं लाघवात् शब्दानुशासनपर्यायवाचकस्य व्याकरणशब्दस्य प्रयोगो युक्तो भवतीत्याक्षेपः। आक्षेपपरिहाराय पर्यायवाचिनोः शब्दानुशासनव्याकरणपदयोः वैसादृश्यं प्रदर्श्यते। शब्दानुशासनमिति अन्वर्थसंज्ञा, व्याकरणमिति संज्ञामात्रमिति भेदः। शब्दा अनुशिष्यन्ते गाव्याद्यपभ्रंशेभ्यो विविच्य ज्ञाप्यन्ते येन तच्छब्दानुशासनमिति व्युत्पत्तेः अन्वर्थसंज्ञावाचकं शब्दानुशासनपदं

व्याकरणस्य प्रयोजनमप्यभिधत्ते। एवं शब्दानुशासनपदं प्रयोजनसमन्वितव्याकरणशास्त्रमाख्याति। व्याकरणपदं तु व्याकरणशास्त्रमात्रमभिधत्ते। एवं ग्रन्थादौ प्रयोजनोक्तेरवश्यम्भावात् फलोन्मुखगौरवं न दोषाय इति न्यायेन शब्दानुशासनपदमेव युक्तमिति प्रकाशाशयः।

ग्रन्थादौ प्रयोजनोक्तेः व्यभिचारदर्शनात् मतमिदं न युक्तम्। भगवान् पाणिनिः स्वग्रन्थे प्रयोजनं नाकथयदिति व्यभिचारः। सूत्रकारस्य प्रयोजनोक्तेरवश्यम्भावाभावादपि सूत्रव्याख्यातृभिः श्रोतृप्रवृत्त्यै प्रयोजनोक्तेरवश्यम्भावात् शब्दानुशासनपदं युक्तमेव भाष्यकाराणामिति चेन्न। श्रोतृप्रवृत्तिसिद्धिरेव प्रयोजनोक्तेः प्रयोजनं वर्तते। तत्र **''कानि पुनः शब्दानुशासनस्य प्रयोजनानि''**[15], **''शास्त्रपूर्वके प्रयोगेऽभ्युदयः''**[16] इत्यादिभाष्यवार्तिकोक्तप्रयोजनेनैव श्रोतृप्रवृत्तिसिद्धिरूपं प्रयोजनोक्तिप्रयोजनं सेत्स्यति। लघुना उपायेन फलसिद्धिसम्भवे गुरूपायस्याश्रयणं दोषायैव भवति। तस्मात् गौरवदोषात् शब्दानुशासनपदं नैव युक्तमिति चेन्न। भाष्यकारवार्तिककारयोः विवरणकारत्वात् वार्तिककारवत् भाष्यकारेणापि प्रयोजनं वक्तव्यमेव। एवं विवरणकारत्वात् प्रकृते शब्दानुशासनपदोपादानद्वारा भाष्यकारस्य प्रयोजनकथनं युक्तमेव भवतीति प्रदीपाशयं सम्यक् स्फुटयति प्रकाशकारः।

एवम्, प्रदीपवाक्यघटकविवरणकारपदोपादानेन व्याकरणशास्त्रस्य प्रयोजनोक्त्यनपेक्षा निवार्यते। भाष्यकारपदग्रहणेन वार्तिकोक्तप्रयोजनेन गतार्थत्वं निराकृतम्। साक्षात्प्रयोजनकथनेन प्रयोजनप्रयोजनैः रक्षादिभिः शब्दानुशासनात्मकप्रयोजनोक्तेः वैयर्थ्यं निषिद्धम्। एवं प्रदीपवाक्यघटकपदानां पदकृत्यं प्रकाशकृता प्रत्यपादि।[17]

### 6.1 इतिशब्दार्थविचारः

प्रकाशे अस्मिन् विषये विशेषविचारो विहितो वर्तते। प्रकाशकृता आदौ इतिशब्दस्य अर्थवैचित्र्यं सोदाहरणं प्रत्यपादि। ''न वेति विभाषा'' (अष्टाध्यायी, 1.1.42) इति सूत्रे इतिशब्दः पदार्थविपर्यासं घटयति। ''ज्वलितिकसन्तेभ्यो णः'' (अष्टाध्यायी, 3.1.140) इति पाणिनिसूत्रे इतिशब्दः आद्यर्थकः। हन्तीति पलायते इति वाक्यघटक इतिशब्दः हेत्वर्थकः। इत्युपाध्यायः कथयति इत्यत्र इतिशब्दः एवमर्थकः। ''तस्मिन्निति निर्दिष्टे पूर्वस्य'' (अष्टाध्यायी, 1.1.66) इति सूत्रघटक इतिशब्दः परतन्त्रस्य स्वरूपावस्थापनार्थकः। प्रकृते भाष्यवाक्येऽपि अथशब्दस्य स्वरूपावस्थापनार्थक इतिशब्द इति सिद्धान्तः। प्रदीपवाक्ये अथशब्दस्यानन्तरम् अयमिति सर्वनामशब्दः पठितो वर्तते। अत्र अथेति अयमिति पदयोः सामानाधिकरण्योपपत्तये इतिशब्दस्य स्वरूपावस्थापनार्थकत्वं स्वीकरणीयमेव।[18] यद्यपि इतिशब्दस्य पदार्थविपर्यासकृत्त्वार्थस्वीकारे अपि सामानाधिकरण्यमुपपद्यते। परन्तु अथशब्दस्य निपातत्वादर्थवत्त्वं नास्ति। निपाताः

द्योतका भवन्ति। एवञ्च अथशब्दः द्योतकः, न तु अर्थवानस्ति। अथशब्दस्यार्थवत्त्वाभावात् इतिशब्देन पदार्थविपर्यासः नैव सम्भवति। तस्मात् परिशेषात् सामानाधिकरण्योपपत्तये इतिशब्दस्य स्वरूपावस्थापनार्थकत्वं सिद्धान्तरूपेणाऽङ्गीकार्यम्। अत्रत्यः प्रकाशग्रन्थः बोधसौकर्याय संवादरूपेण प्रस्तूयते।

**पूर्वपक्षः**

पूर्वं प्रकाशकारेण इतिशब्दस्य बह्वर्थत्वं सोदाहरणं प्रदर्शितम्। तत्र स्वरूपावस्थापनार्थकेतिशब्दस्य उदाहरणरूपेण ''तस्मिन्निति निर्दिष्टे पूर्वस्य'' (अष्टाध्यायी, 1.1.66) इति पाणिनिसूत्रमुदाहृतम्। परन्तु सूत्रेऽस्मिन्नितिशब्दः पदार्थविपर्यासार्थको वर्तते। एवञ्च दृष्टान्ताभावात् भाष्यवाक्यघटकस्य इतिशब्दस्य स्वरूपावस्थापनार्थकत्वमयुक्तमिति पूर्वपक्षाशयः।

**उत्तरपक्षः**

तस्मिन्नित्यादिसूत्रघटकतस्मिन्निति पदस्य पदार्थविपर्यासार्थमितिशब्दः नापेक्षितः। यतो हि तस्मिन्निति पदस्य पदार्थविपर्यासाऽभावे स्वरूपावस्थापनार्थकत्वे सति परिभाषेयं समानानुपूर्विविशिष्टे ''तस्मिन्नणि च युष्माकास्माकौ'' (अष्टाध्यायी, 4.3.2) इत्येकस्मिन् सूत्रे एव प्रवर्तेत। परन्तु एकं प्रयोजनमुद्दिश्य परिभाषाप्रणयनवैयर्थ्यापत्तेः परिभाषाप्रणयन-सामर्थ्यादिव तस्मिन्निति पदस्य पदार्थविपर्यासः सेत्स्यति। तस्मात्तस्मिन्निति सूत्रस्य इतिशब्दः पदार्थविपर्यासार्थमनपेक्षितः। इतिशब्दस्य सार्थक्यमत्र प्रकाशकारेण भिन्नतया प्रादर्शि। तस्मिन्नित्यादिपरिभाषाघटकतस्मिन्नित्यत्र सप्तमीविभक्त्या अधिकरणरूपार्थः निर्दिश्यते। अधिकरणाधेययोः मध्ये आधेयः प्रधानः भवति। एवञ्चाधिकरणमाधेयपरतन्त्रं भवति। इतिशब्दोऽधिकरणस्य पारतन्त्र्यं निराकृत्य अधिकरणरूपमर्थं स्वरूपे अवस्थापयति। तेन च अधिकरणमात्रनिर्देशे परिभाषेयं प्रवर्तते। एवञ्च सूत्रकरणसामर्थ्यात् पदार्थविपर्यासः, तत इतिशब्देन अधिकरणरूपार्थस्य स्वरूपे अवस्थापनमिति प्रकाशकाराशयः। परिभाषासूत्रे तस्मिन्नितिशब्दाभावे अधिकरणस्य पारतन्त्र्यनिरासाभावात् प्रधानस्य आधेयस्य निर्देशे परिभाषा प्रवर्तेतेत्यनिष्टापत्तिः। यतो हि ''इको यणचि'' (अष्टाध्यायी, 6.1.77) इत्यादिसूत्रेषु आधेयनिर्देशाभावात् परिभाषाप्रवृत्तिरेव न स्यात्।

ततः प्रकाशकारः दृष्टान्तं समुपस्थाप्य दार्ष्टान्तं समुपस्थापयितुमुपक्रमते। दार्ष्टान्ते इतिशब्दोऽथशब्दं स्वरूपे अवस्थापयति। अथशब्दोऽत्र अधिकारार्थं द्योतयति। एवञ्च अथशब्दः द्योतकः, अधिकारार्थश्च द्योत्यः। द्योतकः द्योत्यमाकाङ्क्षत इत्यत आकाङ्क्षवान्

द्योतकः द्योत्यपरतन्त्रो भवति। अत्र अयमिति पदान्तरेण समानाधिकरण्यसिद्धये इतिशब्दः द्योत्यपरतन्त्रमथशब्दं स्वरूपे अवस्थापयतीति परतन्त्रस्य स्वरूपावस्थापनरूपं सादृश्यं दृष्टान्तदार्ष्टान्तिकयोः।

**पूर्वपक्षः**

अथशब्दस्य निपातत्वादर्थवत्त्वाभावात् पदार्थविपर्यासार्थकत्वं विहाय स्वरूपावस्थापनार्थकत्वं स्वीक्रियते इतिशब्दस्य। एवमेव "न वेति विभाषा" (अष्टाध्यायी, 1.1.42) इत्यत्र नवाशब्दयो निपातत्वात् पदार्थविपर्यासार्थकत्वं नाङ्गीकार्यमितिशब्दस्येति पूर्वपक्षः।

**उत्तरपक्षः**

दृष्टान्तदार्ष्टान्तिकयोः पार्थक्यं प्रदर्श्य प्रकाशकारः पूर्वपक्षममुं निराकरोत्। दार्ष्टान्ते "स्वं रूपं शब्दस्याशब्दसंज्ञा" (अष्टाध्यायी, 1.1.68) इति सूत्रेण निपातभूतयोः नवाशब्दयोरानुपूर्वीरूपार्थः निश्चीयते। एवञ्च नवाशब्दयोः निपातत्वेऽपि स्वं रूपमित्यादिसूत्रसामर्थ्यप्राप्ताऽर्थवत्त्वात् इतिशब्दस्य पदार्थविपर्यासार्थकत्वं सुतरामेव सेत्स्यति। भाष्यवाक्यघटकस्य अथशब्दस्य तु सामर्थ्याऽभावादर्थवत्त्वाऽभावात् न इतिशब्दस्य पदार्थविपर्यासार्थकत्वं सम्भवति।

## 6.2 अयमित्यादिपदार्थविचारः

भाष्यवाक्येऽस्मिन् अयमिति सर्वनामपदाऽभावे अथशब्दस्य आनन्तर्याद्यर्थानां प्रामाण्यं नास्तीति भ्रमः स्यात्। अयमिति सर्वनामपदोपादानेन निर्दिष्टे भाष्यवाक्येऽस्मिन् अथशब्दोऽधिकारार्थं प्रयुक्त इत्यतः अथशब्दस्यार्थान्तराणां प्रामाण्यविषयकभ्रमो न भवति।

अथेत्यस्य इतिना स्वरूपे अवस्थापनात् भाष्यवाक्ये अथेत्यनेन अकाराद्यानुपूर्वीविशिष्टाथशब्दः गृह्यते। तथापि स्पष्टप्रतिपत्त्यर्थं शब्दशब्दः प्रयुक्तः। इतिना स्वरूपावस्थापनस्य फलं तावत् शब्दग्रहणम्। एवं फलसहितकथनमत्र स्पष्टमिति प्रकाशाशयः।[19]

अथशब्दस्य अधिकारार्थत्वाद् 'अथ शब्दानुशासनम्' इति भाष्यवाक्यस्यार्थः भाष्यकारैः प्रतिपादितः–"**शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्**"[20] इति। अत्र श्रवणाद्यनेकक्रियानिरूपितकर्मत्वं शब्दानुशासनस्य भवितुमर्हति। परन्तु अथशब्देन शब्दा-नुशासनस्य प्रारम्भक्रियानिरूपितकर्मत्वं निश्चीयते। तेन च उपर्युक्तः भाष्यवाक्यार्थः सिद्ध्यति इति प्रदीपे निरूपितम्।

अत्र प्रकाशकारेण संशयोपस्थापनपूर्वकः विचारः प्रस्तुतः। वाक्यार्थज्ञानं पदार्थ-

ज्ञानाधीनमेव भवति। यथा नीलमुत्पलम् इति वाक्यस्य नीलाभिन्नमुत्पलमिति वाक्यार्थः। अत्र नीलपदार्थेन सहोत्पलपदार्थस्य सामानाधिकरण्येन अन्वयो भवति। नीलपदञ्च नीलरूपस्वार्थप्रतिपादनद्वारा वाक्यार्थमुपकरोति। राज्ञः पुरुष इति वाक्यस्य राजसम्बन्धी पुरुष इति वाक्यार्थः। अत्र राजपदार्थेन सह पुरुषपदार्थस्य वैयधिकरण्येन अन्वयो भवति। राजपदञ्च स्वार्थप्रतिपादनद्वारा वाक्यार्थमुपकरोति। प्रकृते अथ शब्दानुशासनमिति वाक्यघटकाथशब्दस्य अर्थवत्त्वाभावात् कथं वाक्यार्थोपकारकत्वं सेत्स्यतीति संशयः। अथशब्दस्य सन्निधिमात्रेण वाक्यार्थ उपक्रियते अथशब्देनेति प्रदीपकारकृतसमाधानं प्रकाशे प्रश्नसहितमुपस्थापितम्।

### 6.3. शब्दानुशासनम् इत्यत्र समासोपपत्तिः

शब्दानाम् अनुशासनम् इति विग्रहे ''षष्ठी'' सूत्रेण समासे शब्दानुशासनम् इति समस्तपदनिष्पत्तिर्जायते। अत्र अनुशासनक्रियानिरूपितकर्म वर्तते शब्दः। अत्र कर्मणि षष्ठ्याः विधानात् ''कर्मणि च'' इति सूत्रेण समासस्य निषेधः स्यादिति संशय आपाततः उदेति। परन्तु,''उभयप्राप्तौ कर्मणि'' इति सूत्रेण यत्र कर्मणि षष्ठी विधीयते, तत्रैव ''कर्मणि च'' इति सूत्रेण समासस्य निषेधः भवतीति युक्त्या शास्त्रकृद्भिः निश्चितः।

शब्दानाम् अनुशासनमित्यत्र ''उभयप्राप्तौ कर्मणि'' इत्यनेन सूत्रेण षष्ठीविधाना-ऽभावहेतुरत्र प्रकाशकारैः प्रदर्शितः। ''उभयप्राप्तौ कर्मणि'' इति सूत्रस्य तात्पर्यं निरूपितं प्रकाशे–''उभयोः कर्तृकर्मणोरुपादानमन्तरेण विवक्षितार्थप्रतिपादनासम्भवो यस्मिन् कृति तत्र कर्मण्येव षष्ठीति सूत्रतात्पर्यार्थ'' इति। शब्दानुशासनम् इत्यत्र कर्तुः आचार्यस्य उपादानं विनैव विवक्षितार्थः सिध्यति। अत्र शब्दकर्मकमनुशासनं न अर्थकर्मकमनुशासनमिति अर्थव्यावृत्तिः विवक्षिता। एतादृशस्य विवक्षितार्थस्य सिद्धये कर्तुः आचार्यस्य वाचकं पदं प्रयोक्तव्यं न भवति। आश्चर्यो गवां दोहः अशिक्षितेन गोपालकेन इत्यत्र गवां कर्मत्वम्। अत्र दोहनक्रियायाः आश्चर्यत्वं विवक्षितम्। दोहनक्रियायाः आश्चर्यत्वं प्रतिपादयितुं कर्तुः अशिक्षितस्य गोपालकस्य उपादानमनिवार्यमेव। तस्मात्, शब्दानाम् अनुशासनमित्यत्र न ''उभयप्राप्तौ कर्मणि'' इति सूत्रस्य प्रवृत्तिः सेत्स्यति। एवं, ''कर्तृकर्मणोः कृति'' इति सूत्रेण षष्ठीविधानात् अत्र ''कर्मणि च'' इति सूत्रेण समासनिषेधः न भवति।

### 7. विमर्शः

'अथ शब्दानुशासनम्' इति भाष्यवाक्यस्य भाष्यकृत्कृतव्याख्यानवाक्यघटक-

पदानामर्थविश्लेषणं प्रदीपे अत्यन्तं सूक्ष्मतया निरूपितम्। प्रकाशकृता प्रदीपव्याख्यानघटकानां सर्वासां पङ्क्तीनां तात्पर्यं प्रसङ्गपूर्वकं प्रत्यपादि। यथा, अत्र इतिशब्दार्थविचारोपस्थापने प्रकाशकारस्य विशेषः दृश्यते। इतिशब्दस्य अर्थविशेषाः प्रकाशकारेण सोदाहरणं प्रदर्शिताः। ततः भाष्यवाक्यघटकेतिशब्दस्य स्वरूपावस्थापनार्थकत्वं परिशेषन्यायेन व्यवस्थापितम्। किञ्च, स्वार्थप्रतिपादनं विनैव अथशब्दसान्निध्यमात्रेणात्र अथशब्दस्य उपकारकत्वमिति प्रदीपमतं प्रकाशे स्वीकृतम्। एतादृशोपकारकत्वे वृद्धव्यवहार एव मानमिति स्वसिद्धान्तमपि प्रत्यपादीत् प्रकाशकारः। ''उभयप्राप्तौ कर्मणि'' इति सूत्रस्य तात्पर्यमपि प्रकाशे अत्यन्तं रमणीयतया प्रतिपादितम्। एवम्, गूढार्थस्य प्रतिपादने प्रकाशकारस्य सरला शैली अत्यन्तं प्रशंसनीया।

**उपसंहृतिः**

एवं शोधपत्रेऽस्मिन् अथ शब्दानुशासनम् इति आद्यस्य भाष्यवाक्यस्य तात्पर्यं महाभाष्यप्रदीपप्रकाशग्रन्थमनुसृत्य प्रतिपादितम्। तत्रादौ महाभाष्योक्तोऽर्थः, ततः प्रदीपव्याख्यानं, ततः महाभाष्यप्रदीपप्रकाशस्य व्याख्यानञ्च प्रस्तुतम्। अन्तिमे प्रकाशव्याख्यानस्य विमर्शः निरूपितः।

*

**सन्दर्भाः–**

1. महाभाष्यम्, पृषोदरादीनि यथोपदिष्टम्
2. महाभाष्यप्रदीपप्रकाशः, पृ.317
3. संस्कृत व्याकरण-शास्त्र का इतिहास, पृ.465
4. महाभाष्यप्रदीपप्रकाशः, पृ.30, महाभाष्यप्रदीपव्याख्या, पृ.110
5. महाभाष्यप्रदीपप्रकाशः, पृ.30, महाभाष्यप्रदीपव्याख्या, पृ.110
6. ''तर्हि निमेषादेरनिच्छापूर्वकत्वेनाप्रयत्ननिष्पाद्यतया तत्र गौणोऽपि प्रयत्नशब्दो न भवेदित्याशङ्क्य पक्षान्तरमाह'', महाभाष्यप्रदीपप्रकाशः, पृ.32
7. ''केचित्तु निमेषादेरनिच्छापूर्वकत्वेनाप्रयत्ननिष्पाद्यत्वाद् ... क्रियात्वेन साध्यत्वेन वा गौणप्रयोगसम्भवात्'', महाभाष्यप्रदीपव्याख्या, प्रथमभागः, पृ.115-116
8. संस्कृत व्याकरणशास्त्र का इतिहास, पृ.460
9. ''अनङ्गादिषूदात्तोच्चारणादियत्नविशेषाश्रयणादेव... प्रवर्तोक्तिमाह-एकश्रुतीति'', व्याकरणमहाभाष्यम् (प्रदीपोद्द्योतव्याख्या छाया), प्रथमखण्डम्, पृ.172
10. संस्कृत व्याकरणशास्त्र का इतिहास, पृ.466

11. महाभाष्यम्, प्रदीपोद्द्योतसहिता छाया, पृ.5
12. तदेव, पृ.5
13. तदेव, पृ.5
14. तदेव, पृ.5
15. व्याकरणमहाभाष्यम् (प्रदीपोद्द्योतव्याख्या छाया), प्रथमखण्डम्, पृ.19
16. व्याकरणमहाभाष्यम् (प्रदीपोद्द्योतव्याख्या छाया), प्रथमखण्डम्, पृ.73
17. ''प्रयोजनमाह इत्यनेन गुरुकरणवैयर्थ्यं पर्यहार्षीत्'', महाभाष्यप्रदीपप्रकाशः, पृ.3
18. ''असति स्वरूपेऽवस्थापने ... व्याख्यानानुपपत्तिस्तत्र हेतुः'', महाभाष्यप्रदीपप्रकाशः, पृ.4
19. ''स्वरूपेऽवस्थापनं फलोक्त्या सुतरां स्पष्टं भवतीत्यभिप्रायः'', महाभाष्यप्रदीपप्रकाशः, पृ.4
20. व्याकरणमहाभाष्यम् (प्रदीपोद्द्योतव्याख्या छाया), प्रथमखण्डम्, पृ.5

*

## किञ्चिद् रामायणीयम्

*** निशि 'लङ्का' कीदृशी?**

- रम्यकाननतोयाढ्या
- रावणपालिता
- शारदाम्बुधरप्रख्यैः भवनैः उपशोभिता
- सागरोपमनिर्घोषा
- सागरानिलसेविता
- सुपुष्टबलसंपुष्टा
- चारुतोरणनिर्यूहा
- पाण्डुरद्वारतेरणा
- भुजगाचरिता गुप्ता
- भोगवती इव शुभा
- विद्युद्घनाकीर्णा
- ज्योतिर्गणनिषेविता
- चण्डमारुतनिर्ह्लादा
- महता शातकुम्भेन प्राकारेण अभिसंवृता
- किङ्किणीनालघोषाभिः पताकाभिः अलङ्कृता
- जाम्बूनदमयैः द्वारैः वैदूर्यकृतवेदिकैः मणिस्फटिकमुक्ताभिः
  मणिकुट्टिमभूषितैः तप्तहाटकनिर्यूहैः राजतामलपाण्डुरैः
  वैदुर्यकृतसोपानैः स्फाटिकान्तरपांसुभिः
  चारुसंजवनोपेतैः खमिवोत्पतितैः शुभैः
  क्रौञ्चबर्हिणसंघुष्टैः राजहंसनिषेवितैः
  तूर्याभरणनिर्घोषैः सर्वतः परिनादिता
- वस्वोकसारप्रतिमा
- अनुत्तमा
- ऋद्धिमती
- उद्यतायुधपाणिभिः रावणबलैः रक्षिता
- रत्नवसनोपेता
- गोष्ठागारावतंसिका
- यन्त्रागारस्तनी
- ऋद्धा
- दीपैः भास्वरैः महाग्रहैः च नष्टतिमिरा

**आधारः - रामायणम्, सुन्दरकाण्डम्, 3 सर्गः**

# ईश्वरास्तित्वसाधककार्यत्वहेतुघटितानुमानविमर्शः

**आलोकसेनः**

**उपोद्घातः**

आस्तिकनास्तिकभेदेन भारतीयदर्शनपरम्परा द्विधा विभक्ता। आस्तिकाः वेदप्रामाण्यवादिनो नास्तिकाः वेदनिन्दकाः। तथाहि श्रुतिप्रामाण्याविरोधिनस्तार्किका आस्तिकाः, श्रुतिप्रामाण्यविरोधिनस्तार्किका नास्तिकाः इति कथ्यते। वेदप्रामाण्यवादिष्वपि केचन ईश्वरवादिनः केचन निरीश्वरवादिनः सन्ति। निरीश्वरवादिषु चाग्रगण्यौ सांख्यमीमांसकौ स्तः। ईश्वरसद्भावे प्रामाण्याभावात् नास्तीश्वरः इति सांख्याभिमतम्। तथाहि तैः सूत्रितम्– 'ईश्वरासिद्धेः' (1.93 सा.सू.) अस्य सूत्रस्यार्थः प्रमाणाभावाद् ईश्वरो नास्तीति। न केवलं तद्धि, अपितु ईश्वरत्वेनाभिमतो यः स किं क्लेशादिमुक्तो वा बद्धो वेति अन्यतरस्यापि असम्भवान्न ईश्वरसिद्धिः। तथाहि सूत्रितम्– 'मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः (1.93 सा.सू.) इति। 'नेश्वराधिष्ठिते फलनिष्पत्तिः कर्मणा तत्सिद्धेः' (5.2 सा.सू.) इति सूत्रमपि ईश्वराभावसाधकमस्ति। परन्तु आस्तिकसम्प्रदायेषु अपि योगन्यायवैशेषिकवेदान्त-सम्प्रदायाः ईश्वरस्य अस्तित्वमङ्गीकुर्वन्ति। योगसूत्रे ईश्वरसाधकं सूत्रम् – 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' (1.24 यो.सू.) इति भगवता ईश्वरस्य अस्तित्वं साधयितुं न्यायदर्शनस्य चतुर्थाध्यायस्य प्रथमे आह्निके सूत्रत्रयं सन्निवेशितम्। तानि सूत्राणि– 'ईश्वरः कारणं, पुरुषकर्माफल्यदर्शनात् (4.1.19 न्या.सू.), न पुरुषकर्माभावे फलनिष्पत्तिः (4.1.20 न्या.सू.), तत्कारितत्वादहेतुः (4.1.21 न्या.सू.) चेति। भगवता कणादेन यद्यपि स्पष्टतया ईश्वरास्तित्वसाधकं सूत्रं न प्रोक्तं तथापि वैशेषिकदार्शनिकानां वचनप्रामाण्याज्ज्ञातुं शक्यते यत् तैः अपि ईश्वरस्य अस्तित्वं स्वीक्रियते। यथोक्तमाचार्येण प्रशस्तपादेन सर्गप्रक्रियावर्णनावसरे – 'ततः पुनः प्राणिनां भोगभूतये महेश्वरसिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः परमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति'[1] इति। वैदान्तिकाः अपि जगत्कारणत्वेन सर्वज्ञत्वेन सर्वेश्वरत्वेन सर्वनियन्तृत्वेनाव्यक्तत्वे-नान्तर्यामित्वेन ईश्वरस्यास्तित्वं स्वीकुर्वन्ति। उक्तञ्च वेदान्तसारे सदानन्दयोगीन्द्रेण – 'इयं समष्टिरुत्कृष्टोपाधिप्रधानतया विशुद्धसत्त्वप्रधाना, एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वर-

त्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलज्ञानावभासकत्वात्'[2] इति। अतो योगन्यायवैशेषिकवेदान्तानुगामिनः ईश्वरवादिन आसन् इत्यत्र नास्ति सन्देहः। आप्तवचनस्य तत्तच्छास्त्रानुगानां समीपे प्रामाण्येऽपि उपविरोधि तस्य प्रामाण्याभावाद् ईश्वरस्य सत्त्वं कथं साधनीयम्? तस्यास्तित्वसाधकं किमपि प्रमाणमस्ति न वेति इत्यादीनां प्रश्नानामालोचनमधस्तात् प्रस्तूयते।

**मूलप्रबन्धः**

''**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्।**''[3] इति महर्षियाज्ञवल्क्यवचनप्रामाण्यात् आत्मसाक्षात्कार एव मनुष्यजीवनस्य चरमोद्देश्यमिति निश्चितमस्ति। स चात्मसाक्षत्कारः श्रवणमनननिदिध्यासनैरेव सम्भवति नान्यथा। तानीमानि श्रवणमनननिदिध्यासनादीनि हि मनीषिभिः दर्शनहतुत्वेन उपात्तानि। तदुक्तं विवरणप्रमेयसंग्रहे–

**श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा तु सततं ध्येय एते दर्शनहेतवः॥**[4] इति।

आत्मेत्यादिश्रुतौ आत्मपदेन जीवात्मा एव बोध्यः। तथाहि जिज्ञासा जीवात्मनः साक्षात्कारेण इष्टतमस्य आत्मसाक्षात्कारस्य सिद्धे आत्मसाक्षात्कारं प्रति जीवात्मनः हेतुत्वमस्तीति ज्ञायते न तु परमात्मनः। अतः परमात्मविषयकमालोचनमेव न करणीयम्, प्रयोजनाभावादिति चेन्न, परमात्मज्ञानेनापि चरमं परममुद्देश्यं सिद्धं भवतीत्यस्मिन् विषये श्रुतिरेव प्रमाणम्। तदुच्यते श्वेताश्वतरोपनिषदि–

''**तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय**'' (6.15) इति।

श्रुतिवचनमिदमाश्रित्यैव उदयनाचार्येण प्रोक्तम्–

**स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः।**
**यदुपास्तमसावत्र परमात्मा निरूप्यते॥** इति।। (1.2 न्या.कु)

तथापि 'मुण्डे मुण्डे मतिर्भिन्ना' इति केचन दार्शनिकसम्प्रदायाः ईश्वरस्यास्तित्वे वैमत्यं भजन्ते। तेषु सांख्यानामभिप्रायोऽस्ति ईश्वरसाधकप्रमाणाभावात्तस्यास्तित्वं नास्ति, 'मानाधीना मेयसिद्धिः' इति वचनप्रामाण्यात्। न हि प्रत्यक्षेण ईश्वरस्य सद्भावत्वं प्रतिपादयितुं शक्यते। प्रत्यक्षं द्विविधम् – बहिरिन्द्रियजन्यप्रत्यक्षं मनोजन्यप्रत्यक्षञ्च। रूपवतः द्रव्यस्य बहिरिन्द्रियजन्यप्रत्यक्षविषयतया रूपशून्यस्य निरवयवस्य ईश्वरस्य बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वाभावाद् बहिरिन्द्रियप्रत्यक्षेण ईश्वरं साधयितुं न शक्यते। न

च ईश्वरो मानसप्रत्यक्षस्य विषयो भवितुमर्हति, स्वात्मनः स्वात्मसमवेतज्ञानादिगुणानां च स्वकीयमनोजन्यप्रत्यक्षविषयत्वेऽपि स्वात्मभिन्नस्य स्वात्मसमवेतज्ञानादिगुणभिन्नस्य च ईश्वरस्य स्वकीयमनोजन्यप्रत्यक्षविषयत्वासम्भवात्। ईश्वरसाधकस्य लिङ्गस्याभावात् न अनुमानेन तत्सद्भावत्वं प्रतिपादयितुं शक्यते। किञ्च, ईश्वरतुल्यस्य कस्यचिदपि अप्रसिद्धत्वात् सादृश्यज्ञानं न सम्भवति। तथाहि सादृश्यज्ञानाभावाद् उपमानमपि न ईश्वरे प्रमाणम्। 'द्यावाभूमी जनयन् देव एकः' इत्यादिना श्रुतिवचनेन यद्यपि ईश्वरस्य अस्तित्वं साधयितुं शक्यते तथापि तदनुपयुक्तं भवति। यतो हि ईश्वरोक्तत्वाद् ईश्वरप्रामाण्येन वेदप्रामाण्यं प्रतिष्ठितं भवति नान्यथा। तथाहि सांख्याचार्यैः ईश्वरस्य सत्त्वे मानाभावात् तस्यास्तित्वमेव न स्वीकृतम्। तथाहि नैयायिकप्रवरेणाचार्येण उदयनेन नित्यनिरतिशयसुखा-भिव्यक्तिप्रयोजनस्य ईश्वरस्यास्तित्वं सयुक्ति प्रतिपादयितुं 'तत्साधकप्रमाणाभावात्' इति सांख्यप्रतिपादितां विप्रतिपत्तिं निराकर्तुं न्यायकुसुमाञ्जल्याः पञ्चमे स्तवके ईश्वरसाधकाः अष्टौ हेतवः सन्निवेशिताः। प्रोक्तञ्च तेन–

**कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः।**
**वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥** इति।। (5.1 न्या.कु.)

कार्यात्, आयोजनात्, धृतेः, आदिपदेन नाशात्, पदात्, श्रुतेः, वाक्यात्, संख्याविशेषाच्च विश्वविदव्ययः साध्यः इति श्लोकार्थः।

अष्टानामीश्वरसाधकानां हेतूनामाद्यमस्ति कार्यमिति। तच्च भावप्रधानतया कार्यत्वेन बोध्यम्। कार्यत्वहेतुसहायेन ईश्वरास्तित्वसाधनमेव अस्य प्रबन्धस्य विषयः। तथाहि कार्यत्वहेतुकमनुमानं भवति क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद्घटवदिति। अनुमानवाक्येऽस्मिन् क्षित्यङ्कुरादिकं पक्षः, सकर्तृकत्वं साध्यम्, कार्यत्वं च हेतुः। क्षित्यङ्कुरादीनां कार्यत्वात्तत्र कार्यत्वहेतुरस्ति इति पक्षधर्मता। यत्र यत्र कार्यत्वं तत्र तत्र सकर्तृकत्वम्, यथा घटः। तथाहि घटादिकार्यं यथा सकर्तृकं तथैव क्षित्यङ्कुरादिकमपि। परन्तु न अस्मदादीनां तत्कर्तृत्वं सम्भवति। अतः तत्कर्तृत्वसाधनार्थं कश्चित् सर्वज्ञः सर्वशक्तिमान् कर्ता अङ्गीकर्तव्यः। स च ईश्वर इति आचार्याभिप्रायः। परन्तु उक्तानुमानेन क्षित्यङ्कुरादिषु ईश्वरकर्तृत्वे तस्य चाशरीरित्वे विरोधिमतानुगतानुमानाकारो भवति – क्षित्यङ्कुरादिकं शरीराभावविशिष्टकर्तृकं कार्यत्वादिति। अनुमानमिदमाश्रित्य विरोधिनः हेतुरयं हेत्वाभासः इत्यामनन्ति। तथाहि तेषां विप्रतिपत्तयः – प्रथमतः, यत्र यत्र शरीरित्वं तत्र तत्र कर्तृत्वमिति व्याप्तिमाश्रित्य विरोधिनामाशयः ईश्वरे कर्तृत्वमस्ति चेत्तर्हि शरीरित्वमप्यस्ति। तथाहि तेषामनुमानम् – ईश्वरः शरीरी कर्तृत्वात् कुलालादिवदिति। परन्तु तस्य शरीरं

नास्त्येव। अतः शरीराभावात् तस्य कर्तृत्वमपि नास्ति। शरीराभावविशिष्टकर्तृकत्वरूपसाध्ये शरीराभावोऽस्ति विशेषणम्। विशेषणाभावाद्विशिष्टाभावः इति न्यायेन पक्षभूते ईश्वरे सकर्तृकत्वरूपसाध्याभावाद्बाधः। द्वितीयतः, क्षित्यादिकं सकर्तृकं कार्यत्वाद् घटवदिति अनुमानस्य प्रतिपक्षानुमानमस्ति क्षित्यादिकमकर्तृकं शरीराजन्यत्वादाकाशवदिति। व्यापकनिवृत्तौ व्याप्यनिवृत्तिरिति न्यायेन कर्तृजन्यत्वव्यापकशरीरजन्यत्वाभावात्कर्तृजन्यत्वाभावः इति सप्रतिपक्षता। तृतीयतः, कर्ता शरीरी एव व्याप्तिः विरोधिनी, अतो विरोधः। चतुर्थतः, घटादौ यथादर्शनप्रवृत्तया व्याप्त्या शरीरी कर्ता उपनेयः परन्तु क्षित्यादौ चाशरीरीति। तथाहि उभयधर्मविशिष्टस्य कर्तुः अभावाद् विशिष्टसाध्याप्रसिद्धिः। पञ्चमतः, अनुमानेऽस्मिन् शरीरजन्यत्वमुपाधिः अस्ति। यत्र यत्र सकर्तृकत्वं तत्र तत्र शरीरजन्यत्वमिति साध्यव्यापकता। यत्र यत्र कार्यत्वं तत्र तत्र शरीरजन्यत्वमिति न साधनाव्यापकता। अतः साध्यव्यापकत्वे सति साधनाव्यापकत्वात् शरीरजन्यत्वमत्र उपाधिः। तथाहि सोपाधिकत्वाद् व्याप्यतासिद्धिः। परन्तु एता विप्रतिपत्तयो निराकृता आचार्येण एकयैव कारिकया–

**न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धो न दुर्बलैः।**
**सिद्ध्यसिद्ध्योर्विरोधो न नासिद्धिरनिबन्धना॥** इति। (न्या.कु.5.2)

प्रथमतः, अधिकरणज्ञानं विना अभावज्ञानासम्भवाद् ईश्वरे धर्मिणि शरीरबाधात् न कर्तृत्वबाधो भवति। यतो हि ईश्वरे शरीराभावरूपज्ञानस्याधिकरणं स्वयमीश्वरः एव। अतोऽनेन अनुमानेन ईश्वरस्य सिद्धिरेव भवति। द्वितीयतः, शरीराजन्यत्वमिति सत्प्रतिपक्षहेतोः शरीरांशः व्यर्थः। यतो हि केवलमजन्यत्वरूपहेतुना अकर्तृकत्वस्यानुमानं सम्भवति। तथाहि व्यर्थविशेषणयोगाद् विरोधिनामनुमाने एव स्वरूपासिद्धिदोषोऽस्ति। अतः शरीराजन्यत्वरूपहेतोः दौर्बल्यान्न सत्प्रतिपक्षता। तृतीयतः, कार्यत्वमस्तु शरीरजन्यत्वं मास्तु इति व्यभिचारशङ्कानिवर्तकस्यानुकूलतर्काभावात् कर्ता शरीर्येव इति विरोधिभिः प्रयुक्ता व्याप्तिः दुर्बला। अतः न विरोधः। चतुर्थतः, कर्तृत्वस्य अशरीरित्वसमानाधिकरणस्य उपलम्भान्न साध्याप्रसिद्धिः। पञ्चमतः, अत्र व्याप्यत्वासिद्धिर्दोषोऽपि नास्ति, अप्रयोजकत्वात्। कर्तृजन्यत्वमस्तु शरीरजन्यत्वं मास्तु इति व्यभिचारशङ्कानिवर्तकस्यानुकूलतर्कस्याभावात् शरीराजन्यत्वं न उपाधिः। अतो हेतौ उपाधेरभावान्न व्याप्यत्वासिद्धः। एवं निर्दुष्टेन कार्यत्वहेतुना कश्चिद् अस्मदादिविलक्षणः कर्ता सिद्ध्यति। स एवेश्वर इति नैयायिकसमयः।

ननु क्षित्यङ्कुरादिकमित्यस्य पक्षत्वे जिज्ञासा। अत्र पक्षतावच्छेदकं किं भवति? क्षितेः पक्षत्वे पक्षतावच्छेदको भवति क्षितित्वम्। अङ्कुरस्य पक्षत्वे पक्षतावच्छेदकं भवति अङ्कुरत्वम्। तथाहि निश्चयाभावात् कस्यापि पक्षतावच्छेदकरूपेण ग्रहणं न सम्भवति।

पुनश्च क्षितिपदं भूमण्डलपरं पृथिवीत्वजात्यवच्छिन्नपरं वा? क्षितिपदस्य पृथिवीत्वावच्छिन्नपरत्वे अङ्कुरादेरुपादानं व्यर्थं स्यात्। तथाहि तस्य भूमण्डलपरत्वरूपार्थमेव ग्रहणीयम्। भूमण्डलपरत्वे भूमण्डलादीनां सर्वेषां पक्षत्वलाभे क्षितित्वं हि पक्षतावच्छेकं भवति। तेन अङ्कुरादेः पृथक् उपादानं व्यर्थं न भवति। प्रोक्तञ्च रामरुद्रीटीकाकारेण– ''तथा च क्षितित्वस्य पक्षतावच्छेकत्वेऽङ्कुरस्यापि क्षितित्वेनाङ्कुरादेः पृथगुपादानमनर्थकमिति भावः। ननु अत्र क्षितिपदं न पृथिवीत्वजात्यवच्छिन्नपरम्, येनाङ्कुरादेरुपादानं व्यर्थं स्यात्, अपि तु भूमण्डलपरमेव, तथा च भूमण्डलपरमेव, तथा च भूमण्डलाङ्कुरादीनां सर्वेषां पक्षत्वलाभे सर्वानुगतं पक्षतावच्छेकं किमित्याशङ्कायां पृथिवीत्वमेव तथेत्युक्तौ नाङ्कुरादेः पृथगुपादानव्यैयर्थ्यम्''[5] इति। अतः क्षितित्वस्य पक्षतावच्छेकत्वे क्षितिः सकर्तृका कार्यत्वाद् घटवदित्यनुमानप्रयोगः फलितः। परन्तु साध्यानुमानं द्विविधं भवति- क्वचित् पक्षतावच्छेकावच्छेदकपरं क्वचिच्च पक्षतावच्छेकसामानाधिकरण्यपरम्। यदि कथ्यते अत्र पक्षतावच्छेकावच्छेदेन अनुमानं करणीयं तर्हि परमाणुषु सकर्तृकत्वरूपसाध्या-भावाद्बाधहेत्वाभासः। बाधस्य लक्षणमुक्तं मुक्तावलीकारेण-'बाधस्तु पक्षे साध्याभावः' इति। पक्षतावच्छेदकसामानाधिकरण्येन साध्यानुमानं चेत्तर्हि घटादौ पक्षे कुलालादिकर्तृजन्यस्य अनुमानात् प्रागपि सिद्धतया अंशतः सिद्धसाधनदोषः। तथाहि कथ्यते जन्यक्षितित्वस्य पक्षतावच्छेकत्वे परमाणुषु जन्यत्वाभावात् न बाधहेत्वाभासप्रसङ्गः। अतः जन्यक्षितिः सकर्तृका कार्यत्वादिति अनुमानाकारः पर्यवसितः इति चेन्न जन्यक्षितित्वस्य पक्षतावच्छेकत्वेऽपि दोषो भवति। अत्र चार्वाकाः कथयन्ति अप्रत्यक्षनित्यपृथिव्याः अभावात्तद्व्यावर्तकं जन्यपदं व्यर्थम्। तथाहि पक्षे व्यर्थविशेषणयोगाद् आश्रयासिद्धिः। अत्र वक्तव्यं यत् पक्षतावच्छेककोटिप्रविष्टविशेषणानां सर्वमते प्रयोजनमपेक्षितमिति नियमाभावान्नास्त्यत्र दोषः। ये नित्यपृथिवीमङ्गीकुर्वन्ति तेषां मते दोषमपाकर्तुं सन्निवेशितमत्र जन्यपदमिति बोध्यम्। तेन न आश्रयासिद्धिः।

अत्र नव्याः कथयन्ति क्षितिः सकर्तृकाः कार्यत्वात्, अङ्कुरं सकर्तृकं कार्यत्वादित्यादि पृथक् पृथक् पक्षकानुमानाभ्यां क्षित्यङ्कुरयोः अनुगतधर्मं पक्षतावच्छेकरूपेण गृहीत्वा तदवच्छिन्नं पक्षत्वेन स्वीकर्तुं शक्यते। तच्च कार्यं जन्यं वा भवति। कार्यत्वस्य पक्षतावच्छेकत्वे कार्यं सकर्तृकं कार्यत्वादिति अनुमानं पर्यवसितम्। तेन कार्यवस्तुमात्रस्य कर्तृत्वेन ईश्वरस्य सिद्धिर्भवतीति न तत्र साध्यासिद्धेः प्रसङ्गः। परन्तु अत्र हेतुपक्षतावच्छेकयोः ऐक्याद्धेतोः सर्वसपक्षविपक्षव्यावृत्तपक्षमात्रवृत्तित्वादसाधारणः। अपि च अनुमानमिदं परार्थानुमानमस्ति। तस्य च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः सन्ति। कार्यं

कर्तृजन्यं कार्यत्वाद् इत्यस्मिन् अनुमाने कार्यं कर्तृजन्यमिति प्रतिज्ञा, कार्यत्वादिति हेतुः, यत्र यत्र कार्यत्वं तत्र तत्र कर्तृजन्यत्वं यथा– घटः इति उदाहरणम्, कार्यं कार्यत्ववदिति उपनयः, अतः कार्यं कर्तृजन्यमिति निगमनम्। अत्र उपनयवाक्यस्य उद्देश्यमस्ति कार्यमिति। उद्देश्यतावच्छेदकं भवति कार्यत्वमिति। तदेवात्र विधेयम्। तथाहि उद्देश्यतावच्छेदकविधेययोः चैक्यान्न शाब्दबोधः। अतोऽत्र शाब्दबोधानुपपत्तिरूप-दोषोऽपि अस्ति। प्रमाणञ्चात्र गदाधरभट्टाचार्यमहोदयस्य वचनम्– **''एवमुद्देश्यता-वच्छेदकविधेययोरैक्येन एको द्वावित्यादिवाक्यादेकत्वाद्वित्वद्यवच्छिन्ने एकत्वद्वित्वादीनां भेदान्वयबोधानुदयाद्''**[6] इति।

अत्र वक्तव्यं यत् नास्ति अत्र असाधारणदोषः। यतो हि नव्यमते असाधारणस्य लक्षणं हि साध्यसमानाधिकरणो हेतुः असाधारणः न तु सपक्षविपक्षव्यावृत्तपक्षमात्रवृत्तिरिति। तथाहि हेतुपक्षतावच्छेकयोः ऐक्ये अपि न असाधारणदोषः, कार्यत्वकर्तृजन्यत्वयोः सामानाधिकरण्यात्।

न च शाब्दबोधानुपपत्तिप्रसङ्गः इति वाच्यम्। यतो हि नव्यानां नये उपनयवाक्यस्य स्वरूपं भवति साध्यव्याप्यहेतुमान् पक्षः इति। अतः कर्तृजन्यत्वव्याप्यकार्यत्ववत् कार्यमित्यस्य उपनयवाक्यत्वे उद्देश्यं कार्यम्, उद्देश्यतावच्छेदकं कार्यत्वं भवति। परन्तु विधेयमस्ति कर्तृजन्यत्वव्याप्यकार्यत्वमिति। तथाहि उद्देश्यतावच्छेदकविधेययोरैक्याभावात् कुतः शाब्दबोधानुपपत्तिप्रसङ्गः? ननु प्राचीनैरुदाहरणवाक्याद् व्याप्तिलाभात् पुनः उपनयवाक्ये तस्य सन्निवेशे पुनरुक्तिदोषो भवति। तथाहि दोषनिराकरणाय हेतुमान् पक्षः इत्यस्य उपनयस्वरूपत्वे उद्देश्यतावच्छेदकविधेययोरैक्यात् पुनः शाब्दबोधानुपपत्तिप्रसङ्ग आगच्छति। भावोऽयं प्रकाशितः रामरुद्रीटीकाकारेणापि – **''प्राचीनैरुदाहरणवाक्यादेव व्याप्ति-लाभादुपनयेनापि तत्प्रतिपादने पौनरुक्त्यमिति पक्षे हेतुमत्तामात्रमेवोपनयेन बोधनीयम्, 'तथा चायम्' इत्युपनयवाक्यस्य हेतुमान्पक्ष इत्येवार्थः इत्यङ्गीकारात्तन्मतानुसारेणैव 'पक्षतावच्छेदकहेत्वोरैक्यात्' इति दूषणाभिधाना-दिति ध्येयम्''**[7] इति। अत्र वक्तव्यं यत् स्वरूपसम्बन्धरूपं कार्यत्वमिति पक्षतावच्छेदकम्, प्रागभावप्रतियोगित्वरूपं कार्यत्वं चात्र हेतुः। तेन हेतुपक्षतावच्छेदकयोः ऐक्यापत्तिर्न भवति। ननु कार्यत्वं स्वरूपेण गृह्यते चेत्तर्हि घटापटादिभेदेन कार्यद्रव्याणामानन्त्यात् कार्यत्वस्यापि तत्तत्स्वरूपत्वे अनुगतपक्षतावच्छेदकलाभः कथं सम्भवतीत्यत्र उच्यते अन्यतमत्वरूपेण सर्वासां कार्यव्यक्तीनां पक्षत्वे कार्यत्वं पक्षतावच्छेदकं भवितुमर्हतीत्यत्र नास्ति संशयः। अत्र अन्यतमत्वं नाम तद्भिन्नभिन्नत्वमिति बोध्यम्। किञ्च,

प्रागभावप्रतियोगित्वरूपकार्यत्वस्य प्रतियोगितायाः स्वरूपसम्बन्धेन स्वाधिकरणे विद्यमानतया पक्षतावच्छेदकाश्रयव्यक्तीनां प्रतियोगित्वाश्रयव्यक्तीनाञ्च अभिन्नतया पक्षतावच्छेदकहेत्वोरैक्यापत्तिः पुनः आगच्छति। अत्र समाधानं – आचार्यरघुनाथनये प्रतियोगितायाः अतिरिक्तपदार्थत्वात् तन्न स्वरूपेण तिष्ठति। तेन न दोषः। परन्तु प्रतियोगितायाः अतिरिक्तपदार्थत्वं न सर्वैः आचार्यैः अङ्गीक्रियते। तथाहि विकल्पेन प्रागभावप्रतियोगित्वं परित्यज्य प्रतियोगितासम्बन्धेन प्रागभावस्य हेतुत्वेनाङ्गीकारे न दोषो भवति।

ईश्वरसद्भावसाधकेऽस्मिन्ननुमाने साध्यमस्ति सकर्तृकत्वम्। ननु कर्तृत्वं किमिति जिज्ञासायामुच्यते उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमिति। अत्र उपादानं नाम समवायि-कारणम्। अतः उपादानगोचरापरोक्षज्ञानम्, उपादानगोचरापरोक्षचिकीर्षा 'कपालेन घटं कुर्याम्' कृतिविषयेच्छा, उपादानगोचरापरोक्षकृतिः च एतत्त्रितयवान् यो भवति स हि कर्ता। परन्तु 'कृतिसत्त्वे घटादिरूपं कार्यं, तदभावे तदभावः' इति अन्वयव्यतिरेकाभ्यां कार्यसामान्यं प्रति कृतेः एव हेतुत्वमस्ति न तु ज्ञानचिकीर्षयोः। यतो हि कृतिं प्रति चिकीर्षा, चिकीर्षां प्रति च ज्ञानं कारणं भवतीति नैयायिकानां राद्धान्तोऽस्ति। यथोक्तं–

**ज्ञानजन्या भवेदिच्छा इच्छाजन्या कृतिर्भवेत्।**
**कृतिजन्या भवेच्चेष्टा चेष्टाजन्या क्रिया भवेत्।।** इति।

तथा च अवश्यक्लृप्तनियतपूर्ववृत्तिकृत्यैव घटादिरूपकार्यसम्भवे तद्भिन्नयोः अपरोक्ष-ज्ञानचिकीर्षयोः अन्यथासिद्धत्वेन कार्यसामान्यं प्रति अहेतुत्वात् कृतिमत्त्वं कर्तृत्वमिति वाच्यम्। कर्तृजन्यत्वं साध्यं भवति चेत्तर्हि जनकतावच्छेदकं भवति कर्तृत्वम्। तच्च कृतिरेव। कृतेश्च व्यक्तिभेदात् भिन्नतया अनन्तकृतीनां जनकतावच्छेदकत्वे गौरवात् कृतिजन्यत्वमेव साध्यं भवति। कृतिजन्यत्वस्य साध्यत्वे तदवच्छेदकं भवति कृतित्वम्। तस्य च एकत्वान्न गौरवम्। न च प्राचीनैः प्रोक्तस्य कर्तुः लक्षणमादाय सकर्तृकत्वं नाम स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमिति वाच्यम्। तथात्वे कृत्या एव कार्ये सिद्धे तद्भिन्नयोः अपरोक्षज्ञानचिकीर्षयोः अन्यथासिद्धत्वेन कार्यसामान्यं प्रति अहेतुत्वात् एतत्त्रि-तयजन्यत्वरूपसाध्यस्य पक्षेऽभावाद् बाधः। न केवलं तद्धि अत्र स्वपदेन कार्यस्य ग्रहणात् क्षितिघटपटादिभेदेन तस्य चानन्त्यात् दृष्टान्तपक्षसाधारणस्य सत्त्वस्यैकस्याभावेन तद्घटितस्वोपादानगोचरसाध्यस्यासम्भवात्तदपि त्याज्यम्। तथा च उपादानगोरकृतिजन्यत्वमेव सकर्तृकत्वमित्येव साध्यस्य लक्षणमस्तु इति चेन्न कृतित्वापेक्षया उपादानगोचरकृतित्वस्य गौरवेण जनकतावच्छेदकत्वात्। तथाहि नव्याः कृतिजन्यत्वमेव सकर्तृकत्वमिति प्राहुः। तेन कार्यं कृतिजन्यं कार्यत्वादिति अनुमानाकारः फलितः।

ननु कृतेः आत्मविशेषगुणत्वात् तदात्मनि समवायेन तिष्ठति न तु घटादिकार्ये। घटादिकार्यजातन्तु स्वावयवे समवायेन तिष्ठति। अतः तयोः सामानाधिकरण्याभावात् कुतः कार्यकारणभावः? अपि च कृतिजन्यत्वस्य साध्यत्वे कार्यरूपपक्षेऽस्मदीयकृतिजन्यत्वस्य विद्यमानात् अनुमितेः पूर्वं पक्षे साध्यनिश्चयात् सिद्धसाधनदोषो भवति। अत्र वक्तव्यं यत् समवायस्य कारणतावच्छेदकसम्बन्धत्वे यद्यपि उक्तौ दोषौ भवतः तथापि विशेष्यतायाः कारणतावच्छेदकसम्बन्धत्वे कोऽपि दोषो न भवति। यथा कृतिः विशेष्यता-सम्बन्धेन कपाले तिष्ठति, तस्मिन्नेव कपाले समवायेन घटस्यापि सत्त्वात् तयोः सामानाधिकरण्ये कार्यकारणभावोऽपि सिध्यति। किञ्च कृतेरात्मसमवेतत्वेऽपि विशेष्यता-सम्बन्धेन तत्राभावात् न सिद्धसाधनप्रसङ्गः। तथाहि कृतिजन्यत्वं विशेष्यतासम्बन्धावच्छिन्न-कृतित्वावच्छिन्न–कारणतानिरूपित–समवायसम्बन्धावच्छिन्नकार्यत्वेन बोध्यम्। अतः कार्यं विशेष्यतासम्बन्धावच्छिन्न–कृतित्वावच्छिन्न–कारणतानिरूपित–समवायसम्बन्धावच्छिन्न–कार्यत्ववत् प्रागभावप्रतियोगित्वाद् घटवदिति अनुमानाकारः पर्यवसितः। तथात्वेऽपि कार्यमात्रस्य पक्षत्वे पक्षतावच्छेदककार्यत्वं ध्वंसेऽपि विद्यते। ध्वंसस्यापि कार्यत्वात् तत्र कार्यतावच्छेदकसम्बन्धो भवति स्वरूपसम्बन्धः। परन्तु तत्र इष्टः कार्यतावच्छेदकसम्बन्धः समवायसम्बन्धः एव। तथाहि ध्वंसे पक्षतावच्छेदककार्यत्वाक्रान्ते विशेष्यतासम्बन्धावच्छिन्न–कृतिनिष्ठ-कारणतानिरूपित–समवायसम्बन्धावच्छिन्नकार्यत्ववद्रूपस्य साध्यस्य पक्षेऽभावाद्बाधः।

न च सत्त्वविशिष्टजन्यत्वमेव पक्षतावच्छेदकमिति वाच्यम्, सत्त्वविशिष्टजन्यत्वस्य ध्वंसवृत्तित्वेऽपि व्यभिचारप्रसङ्गः। उक्तसाध्याभावाधिकरणे ध्वंसे हेतोः प्रागभावप्रतियोगित्वस्य विद्यमानात् साध्याभाववद्वृत्तित्वाव्यभिचारः। तथाहि व्यभिचारशङ्कां वारयितुं हेतावपि सत्त्वविशिष्टमिति दलं योज्यम्। तेन सत्त्वविशिष्टप्रागभावप्रतियोगित्वरूपहेतोः ध्वंसेऽभावात् साध्याभाववदवृत्तित्वान्न व्यभिचारः। अतः सत्त्वविशिष्टकार्यं विशेष्यतासम्बन्धावच्छिन्न-कृतित्वावच्छिन्नकृतिनिष्ठकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यत्ववत् सत्त्वविशिष्टप्राग-भावप्रतियोगित्वाद् घटवदिति फलितोऽनुमानाकारः। सत्त्वविशिष्टप्रागभावप्रतियोगित्वस्य सत्त्वविशिष्टकार्ये विद्यमानात् पक्षधर्मता। यत्र यत्र उक्तहेतुः तत्र तत्र उक्तसाध्यम्, यथा–घटादयः। तथाहि अनेन अनुमानेन सत्त्वविशिष्टकार्यं विशेष्यतासम्बन्धावच्छिन्नकृतित्वा-वच्छिन्नकृतिनिष्ठकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यत्ववदिति अनुमितिर्भवत्येव।

ननु समवायसम्बन्धेन कार्यं प्रति समवायसम्बन्धेन कृतिः कारणम् इति कार्यकारण-भावमवलम्ब्य उक्तमनुमानं प्रयुक्तं चेत्तर्हि कार्यसामान्यं कृतिजन्यमिति सिद्धान्तमसिद्धं

भवति। यतो हि ध्वंसस्य कार्यत्वेऽपि समवायेन कुत्रापि अनुपपत्त्या ध्वंसस्य कृतिजन्यत्वं न सिध्येत्। अतः सिद्धान्तोऽयम् अश्रद्धेयः। उक्तञ्च दिनकर्याम्– **''अथ एवं रीत्या व्याभिचारवारणेऽपि ध्वंसस्य कृतिजन्यत्वेऽपि मानाभावेन कार्यमात्रस्य कृतिजन्यत्वप्रवादो व्याहन्येतेति चेन्न। तादृशप्रवादस्य निर्युक्तिकत्वेना-श्रद्धेयत्वात्''**[8] इति।

परन्तु सर्वत्र प्रसिद्धस्य सिद्धान्तस्याश्रद्धेयत्वं न युक्तमिति मनसि निधाय दिनकरीकारेण तत्र कल्पान्तरं प्रदर्शितम्। तन्नये जन्यत्वमात्रं ध्वंससाधारणमेव पक्षतावच्छेदकम्, कृतिजन्यत्वमात्रं साध्यम्। एवञ्च हेतौ अपि सत्त्वविशिष्टमिति दलं न देयम्, प्रयोजनाभावात्। तेनानुमानाकारो भवति-कार्यं जन्यं वा कृतिजन्यं प्रागभावप्रतियोगित्वाद् घटवदिति। तस्य संस्कृतस्वरूपं भवति जन्यं कृतिनिष्ठकारणतानिरूपितकार्यत्ववत् प्रागभावप्रतियोगित्वाद् घटवदिति। कालिकसम्बन्धेन कार्यसामान्यं प्रति कालिकसम्बन्धेन कृतिः कारणमिति कार्यकारणभावमाश्रित्यैव अनुमानमिदं निरूपितमाचार्येण। तेन जन्यत्वरूपपक्षतावच्छेदकाश्रये ध्वंसेऽपि ईश्वरीयकृतिजन्यत्वस्य सद्भावात् पक्षे साध्याभावरूपबाधस्य सद्भावात् तेषामीश्वरीय-कृतिजन्यत्वमिति न वाच्यमिति चेन्न, अत्र कृतिजन्यत्वमदृष्टद्वारककृतिजन्यत्वम् इति बोध्यम्। तेन घटादिध्वंसस्यादृष्टद्वारकास्मदादिकृतिजन्यत्वेपि अदृष्टद्वारकास्मदादि-कृतिजन्यत्वस्याभावात् तेषामीश्वरीयकृतिजन्यत्वमेव वाच्यम्। अतः अनुमानस्यास्याकारो भवति कार्यमदृष्टद्वारककृतिजन्यं कार्यत्वात् घटवदिति। अनेन अनुमानेन क्षित्यादिषु कार्येषु अदृष्टद्वारककार्यजन्यत्वस्य सिद्धत्वात् तेषां कार्यजातानां कृतिजन्यत्वमस्मदादीनाम् असम्भवात्तत्कृतिजन्यत्वेन ईश्वरसिद्धिर्भवतीति भावः।

**उपसंहृतिः**

ईश्वरसाधकहेत्वष्टकेषु कार्यत्वमिति प्रथमम्। अनेनैवानुमानेन ईश्वरस्य सद्भावत्वं जगत्कर्तृत्वञ्च सिध्यति। अतः तत्साधकप्रमाणाभावात् इति सांख्यैः प्रणीता विप्रतिपत्तिः अयुक्ता। 'द्यावाभूमी जनयन् देव एकः', 'यः सर्वज्ञः सर्ववित्' इत्यादिना श्रुतिप्रामाण्येन तस्यास्तित्वं जगत्कर्तृत्वं यद्यपि सिध्यति तथापि अनुमानकुशलिनां नैयायिकानां नये श्रुतेरपि ईश्वरकृतिजन्यत्वात् तत्सिद्धाभावेन श्रुत्या ईश्वरास्तित्वं साधयितुं न शक्यते। तस्माद्धेतोः नैयायिकाः ईश्वरास्तित्वसाधकानि अनुमानानि प्रयुक्तवन्तः। तेषु अनुमानेषु कार्यत्वहेतुं परित्यज्य इतरानुमानानां स्वरूपमेवं भवति – 1. आयोजनं नाम कर्म। कर्मत्वहेतुकमनुमानं यथा – सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वात् अस्मदादिशरीरक्रियावदिति। 2. धृतित्वहेतुकमनुमानं तावद्

ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितं धृतिमत्त्वात्, वियति विहङ्गमधृतकाष्ठवदिति। 3. पदं नाम व्यवहारः। तद्धेतुकस्यानुमानस्याकारः पटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवदिति। 4.प्रत्ययतो नाम प्रामाण्यात्। तद्धेतुकमनुमानं– वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावदिति। 5. श्रुतिहेतुकमनुमानं – वेदः पौरुषेयो वेदत्वात् आयुर्वेदवदिति। 6. वाक्यहेतुकम् अनुमानं – वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवदिति। 7. संख्याविशेषहेतुकमनुमानं–द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात्। तुल्यपरिमाणककपालद्वयारब्धघटपरिमाणात् प्रकृष्टतादृश–कपालत्रयारब्धघटपरिमाणवदिति। एतेभ्योऽनुमानेभ्यः ईश्वरस्य सद्भावत्वं साधयितुं शक्यते। अतः प्रमाणाभावात् ईश्वरस्यास्तित्वं साधयितुं न शक्यते इति न वाच्यमिति दिक्।

*

**सन्दर्भाः–**


1. प्रशस्तपादभाष्यम्, पृ.108
2. वेदान्तसारः, पृ.90
3. बृहदारण्यकोपनिषद्भाष्यम्, पृ.335
4. विवरणप्रमेयसंग्रहः, पृ.1
5. न्यायसिद्धान्तमुक्तावली (रामरुद्र्याम्), पृ.18
6. व्युत्पत्तिवादः (आदर्शव्याख्यासहितः), पृ.64
7. न्यायसिद्धान्तमुक्तावली (रामरुद्र्याम्), पृ.19
8. न्यायसिद्धान्तमुक्तावली (दिनकर्याम्), पृ.22


*

# शिवसूत्रदृष्ट्या काश्मीरशैवदर्शने आत्मनः स्वरूपसमीक्षणम्

**डा. पार्थसारथि शीलः**

**उपोद्घातः**

त्रिकदर्शनस्य अन्यतमः मूलग्रन्थः शिवसूत्रम्। शिवसूत्राणां रचयिता भगवान् शिव एव। शिवसूत्रं न तु लक्षणप्रदायकः ग्रन्थः अपि तु सिद्धान्तपरकः साधनाप्रधानो ग्रन्थः इति। अष्टमशताब्द्याः प्रथमार्धे आचार्येण वसुगुप्तेन यानि शिवसूत्राणि स्वप्ने महादेवानुग्रहात् अधिगतानि, तानि आगमकल्पानि शैवदर्शने। तस्य शिष्येण भट्टकोल्लटेन स्पन्दकारिकायां जगतः उन्मेषनिमेषहेतुभूताहंविमर्शरूपायाः ज्ञातृत्वकर्तृत्वरूपस्पन्दशक्तेः विवेचनं कृतम्। ततश्च सोमानन्देन स्वस्य शिवदृष्टौ[1] त्रिकदर्शनस्य सर्वाङ्गतत्त्वमुन्मोचितम्। सोमानन्दस्य शिष्येण आचार्येण उत्पलदेवेन ईश्वरप्रत्यभिज्ञाकारिकायां प्रत्यभिज्ञापर्यायं शैवदर्शनं सम्यक् प्रतिष्ठितम्। तदनु दशमशताब्द्यामाचार्येण अभिनवगुप्तेन तन्त्रालोके तन्त्रसारे च शैवदर्शनालोकेन दर्शनस्यास्य सारः प्रदत्तः। गुप्तपादेन ईश्वरप्रत्यभिज्ञाविमर्शिन्यां परात्रीशिकाविवरणे शिवदृष्ट्यालोचने च काश्मीरशिवाद्वयवादस्य तत्त्वानि उन्मोचितानि। इतोऽपि श्रीमद्भगवद्गीतायाः टीकाग्रन्थे भगवद्गीतार्थसंग्रहे काश्मीरशैवदर्शनस्य तत्त्वानुसरणमुखेन व्याख्या ग्रथिता। ''प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यते स आत्मा विज्ञेय'' इति माण्डूक्यश्रुत्यनुसारं शिवस्वरूपस्य ब्रह्मणः चर्चा प्राप्यते। शिवशक्त्योः अभेदरूपोऽयं शिवाद्वयवादः काश्मीरशैवदर्शननाम्ना परिचीयते। अस्यापरं नाम त्रिकमतवाद इति। शिव-शक्ति-अणवः पति-पाश-पशवः वा त्रिकरूपेण परिज्ञायन्ते। इतोऽपि परा-अपरा-परापराणां चर्चाऽपि प्रसङ्गेऽस्मिन् वर्तते। त्रिकमतवादः मूलतः शिवाद्वयवादः। अस्मिन् आगमसम्मते[2] मते द्विनवतिः आगमाः स्वीक्रियन्ते। तेषु च सिद्धानामकमालिन्यश्च मुख्याः आगमग्रन्थाः इति।

**शक्तिशिवयोः सम्बन्धः**

दर्शनेऽस्मिन् सदा शक्तियुक्तः शिवः स्वस्य अभिव्यक्तिरूपेण जगत्सृष्टिमकरोदिति ज्ञानम्। न तु केवलं शिवाद्वयदर्शने अपि तु शाक्तानां मतानुसारमपि शिवशक्त्योरविनाभावसम्बन्धः स्वीक्रियते। गान्धर्वतन्त्रात् प्राप्तवर्णनानुसारं ज्ञायते शिवः

शक्तिभिन्नः न भवति। शक्तिः एव ब्रह्मा, शक्तिरेव विष्णुः– "**त्वमेवाहं न चान्योऽसि ब्रह्माहं विष्णुरप्यहम्। अहमेव सर्वं नास्ति किञ्चित् मया विना।**"[3] शाक्तमतानुसारं महाशक्तिः स्वात्मानं स्त्रीपुरुषभेदेन द्विधा विभज्यते। शिवः तत्र प्रधानः पुरुषः शिवा च तत्र परमा शक्तिरिति। तत्त्वदर्शिभिः शिवशक्त्यात्मकं परापरतत्त्वं ब्रह्मतत्त्वमाख्यायते– "**शिवः प्रधानः पुरुषः शक्तिश्च परमा शिवा। शिवशक्त्यात्मकं ब्रह्म योगिनस्तत्त्वदर्शिनः**"[4] समग्रं जगत् शिवशक्त्यात्मकमेव भवति तत्र च प्रत्येकं पदार्थे वर्तमाना शक्तिः देवी सर्वेश्वरी पदार्थश्च महेश्वरः इति–"**यस्य यस्य पदार्थस्य या या शक्तिरुदीरिता। सा तु सर्वेश्वरी देवी स च सर्वो महेश्वरः**"[5] शक्तिशिवयोः अभिन्नत्वं बहुत्र तन्त्रशास्त्रेषु ध्वनितम्। गान्धर्वतन्त्रे उक्तम्–"**नानयोर्विद्यते भेदो या शक्तिः स शिवो ध्रुवम्। न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।**"[6]

**त्रिकशास्त्रे आत्मनः स्वरूपम्**

त्रिकशास्त्रे आत्मतत्त्व-विद्यातत्त्व-शक्तितत्त्वानां विभाजनं दृश्यते। तत्र शिवतत्त्वे प्रकाशविमर्शयोः अन्तर्भावः भवति, यत्र शिवः प्रकाशस्य द्योतकः शक्तिश्च तत्र विमर्शस्य एव। डा. श्यामाकान्तद्विवेदी-महोदयेन शिवसूत्रस्य प्रस्तावनायां कलाविलासग्रन्थाद् अस्य उल्लेखः कृतः– "**सकलभुवनोदयस्थितिलयमयलीलाविनोदनोद्युक्तः। अन्तर्लीनविमर्शः पातु महेशः प्रकाशमात्रतनुः।**"[7] त्रिकदर्शनानुसारं शिवस्य रूपद्वयं वर्त्तते। विश्वमयः विश्वोत्तीर्णश्चेति, तत्र सर्वाकृतिः विश्वमयः, निराकृतिः विश्वोत्तीर्णः। एकस्मिन् समये कथं तर्हि शिवस्य उभयत्र प्रकाशः? जयरथमतानुसारं दर्पणाद् भिन्नाः घटादयः पदार्थाः यथा दर्पणे प्रतिफलिते सति अभिन्नरूपेण प्रतिभान्ति तथा परमशिवस्य इच्छानुसारं तस्य स्वरूपतः भिन्नरूपेण तस्यैव स्वरूपे अवभासितः स्थावरजङ्गमात्मकः विश्वः तस्य स्वरूपाद् अभिन्नरूपेण प्रकाशितः भवति। अतः स अवभासकरूपेण[8] विश्वमयः विश्वोत्तीर्णश्चेति उभयात्मकः।

त्रिकदर्शने अद्वैतवादस्य पराकाष्ठा परिलक्ष्यते। आणवोपाये सर्वे जीवाः चित्तानि एव आत्मा मन्यन्ते। वसुगुप्तेन आणवोपायस्य तृतीये सूत्रे उल्लिखितम् "**आत्मा चित्तम्।**"[9] आत्मनः चिदात्मकं स्वरूपमजानन्तः योगिनः स्वचित्तमेव आत्मा मन्यन्ते। बह्वीषु योनिषु सञ्चरति अयमात्मा। अतः शिवसूत्रस्य प्रारम्भिके सूत्रे आत्माविषये यथार्थस्वरूपमुल्लिखितम् '**चैतन्यमात्मा**'[10] इति। अनेन संकोचावभासितस्य आत्मनः स्वरूपम् अण्वात्मकं तथा च स्वभावभूतस्य तत्त्वाश्रितस्य आत्मनः स्वरूपं प्रदर्शितम्। अत्र अण्वात्मा एव किञ्चित् कर्तृत्व-ज्ञातृत्वादीनां स्वरूपात्मिकायाः कलातः क्षित्यादिपर्यन्तानां

तत्त्वानां (कञ्चुक-पुर्यष्टकादिषु स्थूलदेहेषु अवस्थानाद्) ज्ञानाभावरूपः अविवेकश्च, मायया आवृतो भवत्येष आत्मा।

शाङ्कराद्वैतवादे ब्रह्म सत्यं जगत् च मिथ्या इति, परन्तु त्रिकनये माया महामाया वा शिवस्य एव स्वसमवेतशक्तेः विकासस्वरूपा, अतः अत्र द्वयात्मक-अद्वयवादः स्वीकृतः। शिवसूत्रविमर्शिन्यां यथार्थं चोक्तम्– ''ईश्वराद्वयदर्शनस्य ब्रह्मवादिभ्यः अयमेव विशेषः।'' यद्यपि दर्शनेऽस्मिन् ''जीवो ब्रह्मैव नापरः'' इति शंकराद्वैतवद् एव ज्ञानम्। चैतन्यपरमार्थतः शिव एव विश्वस्य आत्मा। ''चैतन्यमात्मा'' सूत्रस्यास्य व्याख्यायामाचार्येण अभिनवगुप्तेन कथितम्– ''चैतन्यमात्मा ज्ञानं च बन्ध इत्यत्र सूत्रयोः। संश्लेषेतर-योगाभ्यामयमर्थः प्रदर्शितः।'' अर्थात् द्वौ अर्थौ भवतः। चैतन्यमात्मा, ज्ञानं बन्धः'' (विश्लेषणात्मकस्वरूपम्), अपि च ''चैतन्यमात्माज्ञानं बन्धः'' (संश्लेषणात्मकस्वरूपम्)। अत्र प्रथमस्वरूपगृहीते सति ज्ञानम् आत्मनः बन्धनं चैतन्यं च आत्मा। उभयोः च सम्मिलतेऽर्थे 'चैतन्यमात्माज्ञानं बन्धः' अर्थात् अज्ञानं बन्धरूपमिति। अत्र आचार्यस्य जयरथस्य मतं लक्षणीयम्– संश्लेषेतरयोगाभ्याम् इति संहितया अन्यथा आकारप्रश्लेषविश्लेषणाभ्यां तेन। 'ज्ञानं बन्धः, अज्ञानं बन्ध' इति चायमर्थः इत्यज्ञानशब्दस्य अपूर्णज्ञानाभिधानलक्षणः।[11] अभिनवगुप्तपादेन 'अज्ञानम्' इति पदस्य अर्थः अपूर्णज्ञानरूपेण स्वीकृतः, न तु ज्ञानाभावार्थे– ''अज्ञानमिति न ज्ञानाभावश्चातिप्रसङ्गतः। स हि लोष्टादिकेऽप्यस्ति न च तस्यास्ति संसृतिः। ''जयरथेन च समर्थने कथितम्'' ननु अज्ञानशब्दस्य अपूर्णं ज्ञानमर्थः, इत्यत्र किं निबन्धनं, ज्ञानाभावमात्रमेवास्तु इत्याशङ्क्याह– 'अज्ञानमिति न ज्ञाना....? तद्युक्तमुक्तमज्ञानशब्दस्य अपूर्णं ज्ञानमर्थ इति। शिवसूत्रेषु चतुर्षु मन्त्रेषु मूलतः आत्मनः स्वरूपं वर्णितम्। तानि सूत्राणि–

1. चैतन्यमात्मा (1/1), 2. आत्मा चित्तम् (3/1)

3. नर्तक आत्मा (3/9), 4. रङ्गोऽन्तरात्मा (3/10)

चतुर्णां सूत्राणां मध्ये प्रथमं सूत्रं प्रथमोन्मेषे शाम्भवोपाये आगतम्। एषः शाम्भवोपायः एव उत्कृष्टतम उपायः शैवदर्शने। शिवसंहितानुसारं चैतन्यसृष्टिवादस्य अवधारणाऽपि ज्ञायते– **''चैतन्यात् सर्वमुत्पन्नं जगदेतच्चराचरम्। तस्मात् सर्वं परित्यज्य चैतन्यं तु समाश्रयेत्।''**[12] आत्मानः एव चित्क्रिया प्रकाशिता भवति– ''आत्मत एव चैतन्यं चित्क्रिया चितिकर्तृता। चितिः प्रत्यवमर्शात्मा परावाक्सरसोदिता।'' इति ज्ञायते उत्पलाचार्यमतानुसारमिति। अनन्तरं सूत्रत्रयमाणवोपाये वर्णितम्। आणवोपायः निकृष्टोपायरूपेण परिज्ञायते। तत्र यथाक्रमे आत्मनः चित्तरूपत्वम्, विश्वस्य अभिनेतृत्वं

रङ्गमञ्चरूपेण च अवस्थानत्वम् आत्मनः स्वरूपमिति। आणवोपाय कः? मालिनीविजयतन्त्रे (2/21-13) प्रसङ्गेऽस्मिन् परिभाषेयं प्राप्यते– '**उच्चारकरणध्यानवर्णस्थानप्रकल्पनैः। यो भवेत्समावेशः सम्यगाणव उच्यते।**'[13] भेदात्मककल्पनाभ्यः प्रकल्पिते सति उच्चारादिभ्यः बहिर्भूतैः साधनैः च उपहितत्वादस्य अपरं नाम क्रियोपाय च। क्रियोपायः एव ज्ञानोपायस्य शाक्तोपायस्य च साधनमिति। क्रियोपायः ज्ञानोपायस्य साधनम्, ज्ञानोपायः च इच्छोपायस्य, इच्छोपायः च अनुपायस्य साधनम्। आणवोपायः भेदप्रधानः, शाम्भवोपाये चैतन्यं मायारूपेण व्याख्यातम्। आणवोपाये चित्तमेव आत्मा। शिवसूत्रविमर्शिन्यां चित्तस्य दर्पणवत्स्वरूपप्रसङ्गे चोक्तं– **चेत्यते विमृश्यते अनेन परं तत्त्वम् इति पूर्णस्फुरत्तासतत्त्वप्रासादप्रवणवादिविमर्शरूपं संवेदनं तदेव मन्त्र्यते गुप्तम् अभेदेन विमृश्यते परमेश्वररूपमनेन इति कृत्वा मन्त्रः**।[14] अर्थात् चित्ते तु तादात्म्यभावः तथा च तद्रूपतायाः शक्तयः निहिताः भवन्ति। एवञ्च अभेदपरामर्शरूपस्य सामरस्यस्य शक्तिः मन्त्रः भवति, मूलतः चित्तमेव मन्त्रः इति ज्ञानम्। शाक्तोपायः भेदाभेदप्रधानः।[15] 'नर्तक आत्मा' सूत्रेऽस्मिन् आत्मा नर्तक इति ज्ञानं भवति। शिवसूत्रवार्तिके योगिनः स्वरूपेऽवस्थानाविष्टे सति आनन्दानुभवेन उल्लसितभावः परिस्फुटः भवति– ''ईदृशः सदा स्वात्मविमर्शवेशिताशयः''। विमर्शिन्यनुसारमात्मनः स्वपरिस्पन्दलीलारूपेण आत्मा जगदादि सर्वं प्रकटयति, अतः स नर्तकः– ''**नृत्यति अन्तर्निगूहितस्वस्वरूपावष्टम्भमूलं तत्तज्जागरादि नानाभूमिकाप्रपञ्चं स्वपरिस्पन्दलीलयैव प्रकटयति स्वभित्तौ प्रकटयति इति नर्तक आत्मा।**''[16] जगदत्र नाट्यमञ्चं यत्र सर्वे जीवाः स्वभूमिकां निर्वहन्ति। तत्र केवलमेकः परमेश्वरस्तावत् सर्वं साधयति स्वेच्छावशादिति– ''**संसारनाट्यप्रवर्तयिता सुप्ते जगति जागरूक एक एव परमेश्वरः।**''[17] वेदान्तेऽपि एवमेव संप्राप्यतेलोकवत्तु लीला कैवल्यम् इति। अनन्तरं परवर्तिनि सूत्रे 'रङ्गोऽन्तरात्मा' इत्यत्र अन्तरात्मा एव विश्वाभिनयस्य रङ्गञ्चस्वरूप इति ज्ञानम्। आचार्येण वरदराजेन जगन्नाट्यविषये स्वग्रन्थे उक्तम्– ''**रज्यते जगन्नाट्यक्रीडाकौतुकिनात्मना। इति रङ्गोऽन्तरात्मेति जीवपुर्याष्टकात्मकः।**''[18] चेतना अत्र अन्तरात्मा। मूलत आणवोपाये अणोः चर्चा यत्र अणुर्नाम स्फुटो भेदस्तदुपाय इहाणवः। निर्विकल्पकावस्थायां तस्य उपायस्य विश्रान्तिः अपि शाम्भवोपाये भवति– ''**विकल्पनिश्चयात्मैव पर्यन्ते निर्विकल्पकः।**''[19] अणुरपि (पश्वात्मा) शिव एव, यतो हि स्वस्वरूपस्य गोपनात् पशुस्वरूपं धारयति शिवः। अतः शिवत्वप्राप्तिरेव तत्र नैसर्गिकाधारः। एवं जीवः (पशु/अणु) आणवोपायं गृहीत्वा शनैः शनैः सर्वोच्चस्थानं सोपानैः प्राप्तुं शक्नोति। अतः गुप्तपादेन कथितम्– ''**उच्यते वस्तुतोऽस्माकं शिव एव**

**यथाविधः। स्वरूपगोपनं कृत्वा स्वप्रकाशः पुनःस्तथा।''** वस्तुतो हि शिव एव अस्माकम् अद्वैतवादिनां मते गृहीतपशुभावः। स्वस्वातन्त्र्य-माहात्म्यादात्मानं प्रच्छाद्य तथाविधो बद्धादिरूपः परिमितः प्रमाता स्यात्, स एव पुनः उद्वेष्टायुक्त्या बुध्याद्यपायासादनक्रमेणैव तथा शिवस्वप्रकाशो भवति इति।''[20] उपायानां प्रसङ्गे गुप्तपादस्य मतम्– **एवम् शक्तित्रयोपायं यज्ज्ञानं तत्र पश्चिमम्। मूलं तदुत्तरं मध्यमुत्तरोत्तरमादिमम्।**[21] अपि च अभेदोपायाय मन्त्रोक्तं शाम्भवं शाक्तमुच्यते। भेदोभेदात्मकोपायं भेदोपायं तदाणवम्।[22] आचार्येण वरदराजेन प्रश्नः क्रियते यद् यदि आत्मा चैतन्यवपुर्भवति तर्हि कथं तस्य बन्धनं सञ्जायते? उत्तररूपेण प्राप्यते यद् मलात्मकं ज्ञानं बन्धनमिति। अनेन मलेन आत्मनि अनात्मज्ञानं जायते।

1. अज्ञानमिति तत्राद्यं चैतन्यस्फाररूपिणी।
2. आत्मन्यनात्मताज्ञानं ज्ञानं पुनरनात्मनि।
3. मलं स्वकल्पितं स्वस्मिन्बन्धः स्वेच्छाविभावितः।[23]

इतोऽपि तृतीयोन्मेषे देहात्मवादिनां चित्तस्वरूपमन्यमानानां च जीवानां (अणुः) ज्ञानमपि बन्धनमिति वरदराजेन उक्तम्– **''अस्य चित्तस्वरूपस्य देहादेरात्मनस्त्वणोः ज्ञानं बन्धः''**[24] तत्र प्रश्न उदेति यदि ज्ञानम् आत्मा च उभे स्वयंप्रकाशके भवतः तर्हि कथं बन्धनं ज्ञानस्य कृते प्रयुक्तं भवति? ''आत्मवत्कथम् तस्य बन्धकत्वप्रसङ्गिता?'' तदा उत्तरं प्रत्यभिज्ञारूपेण अस्माकं समक्षमायाति। प्रत्यभिज्ञया मायायाः बन्धनानां च निवृत्तिर्भवति। ''प्रत्यभिज्ञा भवत्येषा तदा सत्यं त्वदीरितम्। किं नाम प्रत्यभिज्ञा? अहमीश्वर एव नान्य इत्येवं यः साक्षात्कारः स प्रत्यभिज्ञेत्युच्यते[25] अथवा प्रतीपमात्माभिमुख्येन ज्ञानं प्रकाशः प्रत्यभिज्ञा।''[26]

**उपसंहारः**

अविद्यावशाद् जीवः स्वस्य शिवत्वं विस्मृत्य अणुत्वं लभते, ततश्च साधनया अविद्यापाशं नाशयित्वा पुनः शिवत्वमाप्नोति सोऽहं शिवेति प्रत्यभिज्ञा च जायते। त्रिकशास्त्रस्यास्य अपरं नाम स्वातन्त्र्यवादः, आभासवादः षडर्धशास्त्रं वा। अनुत्तरः इच्छा उन्मेषाश्च शक्तित्रयं त्रिगाख्यया भूषितम्।[27] परा-अपरापरापराणां शक्तीनामपि कुत्रापि वा त्रिकत्वम्।[28] दर्शनेऽस्मिन् केषुचित् स्थलेषु चिच्छक्तीच्छाशक्तिज्ञानशक्तीनां त्रिकसंज्ञा अपि प्राप्यते। गीतार्थसंग्रहस्य सर्वान्तिमे अभिनवगुप्तेन प्रदर्शितं सुचारुरूपेण यामलस्वरूपम्। तेन उक्तं– **''अभिनवरूपा शक्तिस्तद्गुप्तो यो महेश्वरो देवः। तदुभययामलरूपमभिनवगुप्तं शिवं वन्दे।''**[29] तत्र माया खलु कलादीनां तत्त्वानामविवेको माया। मायायाः प्रभावेण प्रत्यभिज्ञा भवितुं नार्हति– **''सैव सम्मोहिनी**

**माया तत्त्वाख्यातिमयं जगत्**''[30] एवं प्रतीपमात्माभिमुख्येन ज्ञापनं प्रत्यभिज्ञा अत्र अहम् एव शिवस्वरूपः इति ज्ञानम्। एवम् अयम् आत्मा शिवः चिदानन्दरूपः शिवोऽहम् इति सारः। कारणं स एव परमेश्वरस्य लीलात्मकजगति वयञ्च क्रीडनकाः, स एव क्रीडापण्डितः। आत्मनः यथार्थस्वरूपज्ञानेन सत्यज्ञानेन उभयोः भेदः नैव वर्तते शिवज्ञानाद् आत्मतत्त्वोपलब्धेः फलप्रसूतादिति।

**किन्तु दुर्घटकारित्वात् स्वाच्छन्द्यान्निर्मलादसौ।**
**स्वात्मप्रच्छादनक्रीडापण्डितः परमेश्वरः॥**[31]

*

**सन्दर्भाः**


1. आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्वपुः।
अनिरुद्धेच्छाप्रसरः प्रसरदृक्क्रियः शिवः।। शिवदृष्टिः, 1.2
2. आगतं शिववक्त्रेभ्यो गतञ्च गिरिजाश्रुतौ।
मतं श्रीवासुदेवस्य तस्मादागम उच्यते।। सुखमय भट्टाचार्यः, भूमिका, तन्त्रालोकः।
3. गान्धर्वतन्त्रम्, 3.44
4. शास्त्रमूलक भारतीय शक्तिसाधना, पृ.353
5. वा नि, 7.1
6. गान्धर्वतन्त्रम्, 40.4
7. द्विवेदी, प्रस्तावना, शिवसूत्र, पृ.16
8. विश्वाकृतित्वाच्चिदचित्तद्वैचित्र्यावभासकः। तन्त्रालोकः
9. शिवसूत्रम्, 3.1
10. शिवसूत्रम्, 1.1
11. जयरथः, विवेकः, प्रथमाह्निकम्।
12. शिवसंहिता
13. तन्त्रालोकः, 1.170
14. शिवसूत्रविमर्शिनी, 2.1
15. आणवे पुनर्भेदस्यैव प्राधान्यम्, विवेकः, 1.220
16. शिवसूत्रविमर्शिनी, 3.9
17. श्यामाकान्त द्विवेदी, शिवसूत्रम्, पृ.404
18. वरदराजः, शिवसूत्रवार्तिकम्।
19. तन्त्रालोकः, 1.229
20. विवेकः, 1.223
21. तन्त्रालोकः, 1.241
22. तन्त्रालोकः, 1.230
23. वरदराजः, सूत्रवार्तिकम्, 3.2
24. शिवसूत्रवार्तिकम्, 3.2
25. प्रत्यभिज्ञादर्शनम्, सर्वदर्शनसंग्रहः
26. ईश्वरप्रत्यभिज्ञा
27. तन्त्रालोकः, 3.191
28. त्रिकं परादिशक्तित्रयाभिधायकं शास्त्रम्, तन्त्राभिधानम्, प्रथमः भागः।
29. गीतार्थसंग्रहः, समाप्तिश्लोकः 4
30. वरदराजः, शिवसूत्रवार्तिकम्
31. तन्त्रालोकः, 4.10


*

# फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग<br>आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग<br>आरा (विहारः) |
| 6. | तेषां जनानां नामानि<br>सङ्केताश्च ये समाचारपत्रस्य<br>स्वामिनः स्युः तथा च ये<br>समस्तव्ययस्य एकप्रतिशतात्<br>अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मौलाबाग<br>आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

आरण्यकम् (XXXI/1) मार्च 2023
अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका ( UGC Carelisted )

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि